# संस्कृतसाहित्यमञ्जरी

## (दशमश्रेणीनिमित्तम्)

## तृतीयभाषा– संस्कृतपाठ्यपुस्तकम्

प्रकाशिका

**माध्यमिकशिक्षापरिषद्, ओडिशा**

https://withteachers.in/

# संस्कृतसाहित्यमञ्जरी

**दशमश्रेणीनिमित्तम्**

**तृतीयभाषा-संस्कृतपाठ्यपुस्तकम्**

**ओडिशामाध्यमिकशिक्षापरिषदा दशमश्रेणीनिमित्तम् अनुमोदितं प्रकाशितं च,**

**© माध्यमिकशिक्षापरिषद्, ओडिशा**

**लेखक-सम्पादकमण्डली**

प्रोफेसर गोपालकृष्ण दाशः (विशिष्टः समीक्षकः)
प्रोफेसर सुलोकसुन्दर महान्तिः (समीक्षकः)
डक्टर पतितपावन वानार्जी (लेखकः)
पण्डित सत्यनारायण दाशः (लेखकः)
डक्टर निरञ्जन दाशः (लेखकः)
पण्डित ज्ञानरञ्जन शतपथी (संयोजकः)

**ଲେଖକ-ସମ୍ପାଦକମଣ୍ଡଳୀ**

*ପ୍ରଫେସର ଗୋପାଳକୃଷ୍ଣ ଦାଶ (ବିଶିଷ୍ଟ ସମୀକ୍ଷକ)*
*ପ୍ରଫେସର ସୁଲୋକସୁନ୍ଦର ମହାନ୍ତି (ସମୀକ୍ଷକ)*
*ଡକ୍ଟର ପତିତପାବନ ବାନାର୍ଜୀ (ଲେଖକ)*
*ପଣ୍ଡିତ ସତ୍ୟନାରାୟଣ ଦାଶ (ଲେଖକ)*
*ଡକ୍ଟର ନିରଞ୍ଜନ ଦାଶ (ଲେଖକ)*
*ପଣ୍ଡିତ ଜ୍ଞାନରଞ୍ଜନ ଶତପଥୀ (ସଂଯୋଜକ)*

**प्रथमसंस्करणम् -2013**
**2019**

**अक्षरसज्जा - केशरी एन्टरप्राइजर्स**
**बिड़ानासी, कटक**

**मुद्रणम् -**

**मूल्यम् - ₹**

https://withteachers.in/

# पुरोवाक्

राष्ट्रिय पाठ्यक्रम रूपरेखाम् (NCF-2005) अनुसृत्य राज्यपाठ्यक्रमरूपरेखा (SCF-2007) परिकल्पिता अस्ति, छात्राणां विद्यालये अनुभव: यथा व्यापक: भवेत्, पाठ्यविषयान् प्रति तेषाम् उन्मुखता वर्धेत इति विचिन्त्य राष्ट्रियमाध्यमिकशिक्षा (RMS) कार्यक्रमे योजना स्वीकृता । परिवारे बृहत्तरे समाजे च विद्यार्थिनां संयोगसूत्रस्थापनाय विद्यालयस्य भूमिका गुरुत्वपूर्णा । शिक्षकाणां छात्राणां च मध्ये पारस्परिकसहयोगस्य भूमिका गुरुत्वपूर्णा । शिक्षकाणां छात्राणां च मध्ये पारस्परिकसहयोगस्य आन्तरिकसम्बन्धस्य च प्रतिष्ठार्थं कार्यक्रम: कल्पित: । मनस्तत्त्वदृष्ट्या अध्ययनं प्रति छात्राणाम् अभिरुचिवर्द्धननिमित्तम् उपाय: सुष्ठु प्रदर्शनीय: । श्रवण-कथन-पठन–लेखन-विधिमाध्यमेन अध्ययनाध्यापन– निमित्तम् उपयुक्तानां पाठ्यपुस्तकानां विरचनं गुरुत्वपूर्णं कार्यम् । तदर्थम् अयं नवीन: प्रयोग: अभिनन्दनीय: ।

छात्राणां मनोयोगविकाशाय आचार्याणां प्रेरणा महतीं भूमिकां निर्वाहयति । उपादेयप्रश्नमाध्यमेन शिक्षका: छात्रान् अध्यापयेयु: । पाठ्यपुस्तकम् एतदर्थं प्रमुखं साधनं भवति ।

पाठ्यपुस्तकस्य अभ्यासबलेन समन्वित: कार्यक्रम: सफलो भवेदित्याशास्यते । पाठ्यपुस्तकसमिते: लेखकमण्डल्या: पाठ्यक्रमसमिते: सदस्यानां च सहयोगेन पाठ्यपुस्तकं पाठकानां समक्षम् उपस्थापितम् । विशेषज्ञा: आचार्या: पाठकाश्च सुचिन्तितं परामर्शं दास्यन्ति इति निवेदनम् ।

सभापति:

माध्यमिक-शिक्षा-परिषद्, ओडिशा, कटकम् ।

https://withteachers.in/

# शिक्षकान् प्रति

प्रेष्ठा बन्धवः,

भारतीयसंविधानस्वीकृता संस्कृतभाषा माध्यमिकस्तरे पाठ्यक्रमे स्वीकृता । तदर्थं समन्वितः पाठ्यक्रमः प्रस्तुतः । पाठ्यक्रमेषु केन्द्रस्तरे राज्यस्तरे च अस्याः अध्यापनानिमित्तं बहूनि पाठ्यपुस्तकानि रचितानि । अस्माकम् ओडिशाराज्ये माध्यमिकस्तरे तृतीयभाषारूपेण संस्कृतस्य प्रचाराय प्रसाराय सर्वोपरि लोकप्रियतायाः च वर्धनाय पाठ्यपुस्तकं रचितम् । राष्ट्रप्रीतेः, मूल्यबोधस्य, आचारसंहितायाः, संस्कृतेः, भाषायाः साहित्यस्य च शिक्षणाय संस्कृतस्य उपादेयता सार्वकालिकी अस्ति । विज्ञाने, लोकविज्ञाने, चिकित्साशास्त्रे, वास्तुनिर्माणे, गणिते, समाजशास्त्रे, राजनीतौ, न्यायविद्यायाम् अन्येषु विषयेषु च संस्कृतं महान्तम् उपकारं दर्शयति । इदं पाठ्यपुस्तकं तत् सोपानपर्वसु सरलतमं साधनम् । शिक्षकाः स्वानुभवाभिज्ञताबलेन आदर्शस्थानीयाः सन्ति । ते स्वपाठ्यशैल्या छात्राणाम् उत्साहं वर्धयन्ति । ते पुस्तकगतान् विषयान् स्वीकृत्य छात्राणाम् अभ्यासवर्धनेन सह बौद्धिकं विकासं साधयिष्यन्ति इति विश्वासः । पाठ्यपुस्तकरूपेण इयं संस्कृतसाहित्यमञ्जरी भवतां सहचरी भविष्यतीति आशास्यते ।

इति

लेखकमण्डली

https://withteachers.in/

# सूचीपत्रम्

| विषयाः | | पृष्ठाङ्काः |
|---|---|---|


| | | |
|---|---|---|
| | भारतगीतिका | 01 |
| | वन्दे उत्कलजननि ! | 02 |
| | **गद्यभागः** | |
| १. | उपदेशामृतम् | 03 |
| २. | सुशिष्यः उपमन्युः | 08 |
| ३. | वराहोपाख्यानम् | 13 |
| ४. | सिंहशृगालशिशुकथा | 18 |
| ५. | बककुलीरककथा | 24 |
| ६. | जन्मवर्वरकथा | 30 |
| ७. | बलीयसी केवलमीश्वरेच्छा | 35 |
| ८. | स्वामी विवेकानन्दः | 41 |
| ९. | वैज्ञानिकः डक्टर अब्दुलकलामः | 46 |
| १०. | भौतिकं पर्यावरणम् | 53 |
| | **एकाङ्किकाभागः** | |
| ११. | शिशुवात्सल्यम् | 61 |
| १२. | देहि पदपल्लवमुदारम् | 68 |
| | **पद्यभागः** | |
| १३. | सीतायाः वनगमनम् | 76 |
| १४. | युधिष्ठिरयक्षसंवादः | 84 |
| १५. | मोहमुद्गरः | 89 |
| १६. | जननी गरीयसी | 93 |
| | **अनुच्छेदभागः** | |
| १. | असाध्यसाधनम् | 97 |
| २. | सन्निमित्ते वरं त्यागः | 98 |
| ३. | बुद्धिर्यस्य बलं तस्य | 99 |
| ४. | यशोदेहेन जीवति | 100 |
| ५. | हीराकुदबन्धः | 101 |
| ६. | परबुद्धिर्भयङ्करी | 102 |
| ७. | सर्वंसहा | 103 |
| ८. | किं फलमस्ति दानस्य | 104 |
| ९. | अहिंसाचरणम् | 105 |
| १०. | अस्माकं राष्ट्रियध्वजः | 106 |


S34YHD

●

https://withteachers.in/

https://withteachers.in/

# भारतगीतिका

**कविवरः राधानाथ रायः**

सर्वेषां नो जननी भारत-धरणी कल्पलतेयम् ।

जननीवत्सलतनयगणैस्तत् सम्यक् शर्म विधेयम् ।। ध्रुवम् ।



हिमगिरि-सीमन्तित-मस्तकमिदमम्बुधि-परिगतपार्श्वम् ।

अस्मज्जन्मदमन्नदमनिशं श्रौतपुरातनमार्षम् ।।

विजनितहर्षं भारतवर्षं विश्वोत्कर्षनिदानम् ।

भारतशर्मणि कृतमस्माभिर्नवमिदमैक्यविधानम् ।।

भारतपङ्कजदलमिदमुत्कलमण्डलमिति विदितं यत् ।

तस्य कृते वयमत्र समेता विहिताचोत्कलसंसत् ।।

x x x x x

भारत-हितसम्पादनमेव हि कार्यमिष्टमविपाकम् ।

भारतवर्जं किमपि न कार्यं निश्चितमित्यस्माकम् ।।

x x x x x

भारतमेका गतिरस्माकं नापरास्ति भुवि नाम ।

सर्वादौ परिषत्कर्मणि तत् भारतमेव नमामः ।।



https://withteachers.in/

# वन्दे उत्कलजननि !

*मूलरचयिता– कान्तकविः लक्ष्मीकान्त महापात्रः*
*(संस्कृतरूपान्तरम्)*

वन्दे उत्कलजननि !
चारुहासमयि ! चारुभाषमयि !
जननि ! जननि ! जननि ! (ध्रुवपदमिदम्)
पूत-पयोधि-विधौत-शरीरे !
ताल-तमाल-सुशोभित-तीरे !
शुभ्र-तटिनीकूल-शीकर समीरे ।।
जननि ! जननि ! जननि ! ।।



घनघनवनभूमिराजिनिजाङ्गे !
नीलभूधरमालासज्जतरङ्गे !
कलकलमुखरितचारुविहङ्गे !
जननि ! जननि ! जननि ! ।।
सुन्दरशालि-सुशोभित क्षेत्रे !
ज्ञानविज्ञान-प्रदर्शित-नेत्रे !
योगिमुनिगण कुटिर पवित्रे !
जननि ! जननि ! जननि ! ।।
सुन्दर-मन्दिर मण्डितदेशे !
चारुकलावलीशोभितवेशे !
पुण्यतीर्थचय-पूर्ण प्रदेशे !
जननि ! जननि ! जननि ! ।।
उत्कल-शूरवर-दर्पित-गेहे !
अरिकुल-शोणित-चर्च्चित देहे !
विश्व-भूमण्डलकृतवर स्नेहे !
जननि ! जननि ! जननि ! ।।
कविकुलमौलिसुनन्दनवन्द्ये !
भुवनविघोषित कीर्त्त्याऽनिन्द्ये !
धन्ये पुण्ये नित्यशरण्ये !
जननि ! जननि ! जननि ! ।।



https://withteachers.in/

S3WM2B

**गद्यभागः**

# उपदेशामृतम्

*पुरा गुरुकुले आचार्याः सदाचारशिक्षानिमित्तं वेदादिभ्यः शास्त्रेभ्यः सूक्तवाक्यानि संगृह्य यदनुशासनं कुर्वन्ति स्म, तदनुशासनमेव उपदेशः । गुरोः उपदेशं प्राप्य आचरणे प्रदर्श्य च मनुष्यः अमृतत्वं लभते । संप्रति विज्ञानयुगेऽपि एतेषाम् उपदेशामृतानां प्रासङ्गिकता अस्ति । विद्यार्थिनां सुशिक्षार्थं कानिचित् उपदेशवाक्यानि अत्र प्रदत्तानि ।*

एकं सद् विप्रा बहुधा वदन्ति । ऋतस्य पथा प्रेत । अहमनृतात् सत्यमुपैमि । श्रद्धया सत्यमाप्यते ।

माता भूमिः पुत्रोऽहं पृथिव्याः । वयं राष्ट्रे जागृयाम । मित्रस्य चक्षुषा समीक्षामहे । न स सखा यो न ददाति सख्ये ।

तन्मे मनः शिवसङ्कल्पमस्तु । आरोह तमसो ज्योतिः । चरैवेति चरैवेति चरन् वै मधु विन्दति । विद्ययामृतमश्नुते ।

सत्यंवद । धर्मं चर । स्वाध्यायान्मा प्रमदः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् ।

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि ।

मा हिंसीः पुरुषान् पशूंश्च । मा गृधः कस्यस्विद् धनम् ।

उत्तिष्ठत । जाग्रत ! प्राप्य वरान् निबोधत ।

एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् ।

## टिप्पणी

**गुरुकुले** – (ଗୁରୁକୁଳରେ) ପ୍ରାଚୀନ ବୈଦିକଯୁଗର ଶିକ୍ଷାକେନ୍ଦ୍ର ଯେଉଁଠାରେ ଗୁରୁଙ୍କସହ ଶିଷ୍ୟଗଣ ରହି ଶିକ୍ଷାଲାଭ କରୁଥିଲେ, ତାହା ଗୁରୁକୁଳ ନାମରେ ପ୍ରସିଦ୍ଧ ଥିଲା । **वेदादिभ्यः शास्त्रेभ्यः** – ବେଦ ପ୍ରଭୃତି ଶାସ୍ତ୍ରଗୁଡ଼ିକରୁ (ଜ୍ଞାନ ଓ ଅନୁଶାସନ ସମ୍ବଳିତ ଗ୍ରନ୍ଥଗୁଡ଼ିକରୁ) । **सूक्तवाक्यानि** – ଉତ୍ତମ ନୀତିବାକ୍ୟଗୁଡ଼ିକୁ । **एकं सत्** – ଏକମାତ୍ର ସତ୍ ତତ୍ତ୍ୱ । **बहुधा** – ବହୁ ପ୍ରକାରରେ । **ऋतस्य** – ସତ୍ୟର ।



https://withteachers.in/

पथा – ମାର୍ଗରେ । प्रेत – ଯାଅ । अनृतात् – ମିଥ୍ୟାରୁ । सत्यमुपैमि = सत्यम् + उप + एमि(गच्छामि) । श्रद्धया –ଆଦରହେତୁ (ହେତୌ ୩ୟା) ।सत्यम् –ଉକ୍ତେ କର୍ମଣି ୧ମା ।आप्यते –ପ୍ରାପ୍ତ ହୁଏ ।पुत्रोऽहम् –ପୁତ୍ରଃ + ଅହମ୍ । पृथिव्या: – ପୃଥିବୀର । जागृयाम – ଜାଗ୍ରତ ହେବା ଉଚିତ । चक्षुषा – ଦୃଷ୍ଟିରେ (କରଣେ ୩ୟା) । समीक्षामहे – ଦେଖିବା। सखा – ମିତ୍ର । सख्ये – ସଂପ୍ରଦାନେ ୪ର୍ଥୀ । तन्मे – ତତ୍ + ମେ । शिवसङ्कल्पम् – ଶୁଭବିଚାରମୟ । तमस: – ଅନ୍ଧକାରରୁ (ଅଜ୍ଞାନତାରୁ)। ज्योति: – ଆଲୋକକୁ (ଜ୍ଞାନଜ୍ୟୋତିକୁ) ।आरोह = ଆରୋହଣକର । चरैवेति – ଚର + ଏବ + ଇତି ଅର୍ଥାତ୍ ଅଗ୍ରସର ହୁଅ । चरन् – ଚର୍ + ଶତୃ (ଗତି କରୁଥିବା ମନୁଷ୍ୟ) । मधु – ମଧୁ (ଅମୃତ) । विन्दति – ଲାଭକରେ । विद्ययामृतमश्नुते – ବିଦ୍ୟୟା + ଅମୃତମ୍ + ଅଶ୍ନୁତେ – ବିଦ୍ୟାଦ୍ୱାରା ଅମୃତକୁ ଲାଭକରେ ।स्वाध्यायान्मा – ସ୍ୱାଧ୍ୟାୟାତ୍ + ମା (ନିଜ ଅଧ୍ୟୟନରୁ) । मा – न (ନାହିଁ) । प्रमद: – ବିରତହୁଅ । सत्यान्न – ସତ୍ୟାତ୍ + ନ । प्रमदितव्यम् – ନିବୃତ୍ତ / ବିରତ ହେବା ଉଚିତ । भूत्यै –ସଂପଦ / ନେତୃତ୍ୱ / ସଂପାଳନ / ସଂପୋଷଣ ନିମିତ୍ତ (ନିମିତ୍ତାର୍ଥେ ୪ର୍ଥୀ)। स्वाध्यायप्रवचनाभ्याम् – ପଠନ ପାଠନରୁ । देवपितृकार्याभ्याम् – ଦୈବକର୍ମ (ଯଜ୍ଞାଦି) ଓ ପିତୃକର୍ମ (ଶ୍ରାଦ୍ଧତର୍ପଣାଦି)ରୁ । आचार्यदेवो भव – ଗୁରୁଙ୍କୁ ଦେବତା ଜ୍ଞାନ କରୁଥିବା ଶିଷ୍ୟଟିଏ ହୁଅ ।अतिथिदेवो भव – ଅତିଥିଙ୍କୁ ଦେବତା ଜ୍ଞାନ କରୁଥିବା ଗୃହସ୍ଥଟିଏ ହୁଅ ।अनवद्यानि – ଅନିନ୍ଦିତ, ଦୋଷଶୂନ୍ୟ ।सुचरितानि – ଆଦର୍ଶଚରିତ ।त्वयोपास्यानि – ତ୍ୱୟା + ଉପାସ୍ୟାନି = ତୁମେ ଆଚରଣ କରିବା ଉଚିତ । नो इतराणि – ଅନ୍ୟଗୁଡ଼ିକୁ ନୁହେଁ। मा हिंसी: – ହିଂସାକର ନାହିଁ । पशूंश्च – ପଶୂନ୍ + ଚ। कस्यस्विद् – କାହାର। मा गृध: – ଲୋଭକର ନାହିଁ ।वरान् – ଜ୍ଞାନୀମାନଙ୍କୁ। प्राप्य – ପ୍ରାପ୍ତହୋଇ ।निबोधत – ବୁଝିନିଅ ।

## अभ्यास:

**1. निजभाषया प्रायश: वाक्यत्रयेण उत्तरं लिखत ।**

(क) कस्तावदुपदेश: ? संप्रति एतेषामुपदेशानां कथं प्रासङ्गिकता अस्ति ?

(ख) कुत: न प्रमदितव्यमिति उपदेशा: प्रदत्ता: ?

(ग) कानि कर्माणि सेवितव्यानि उपास्यानि च ?



https://withteachers.in/

**2. संक्षेपेण उत्तरं लिखत ।**

(क) किं के बहुधा वदन्ति ?

(ख) कस्य पथा प्रेत ?

(ग) कथं सत्यम् आप्यते ?

(घ) का मम माता ?

(ङ) ऋतस्य इति पदस्य कोऽर्थः ?

(च) अहं कस्याः पुत्रः ?

(छ) वयं कुत्र जागृयाम ?

(ज) केन वयं समीक्षामहे ?

(झ) कः सखा न भवति ?

(ञ) मम मनः कथमस्तु ?

(ट) कुतः ज्योतिः आरोह ?

(ठ) कथं मधु विन्दति ?

(ड) कस्यै न प्रमदितव्यम् ?

(ढ) आचार्यदेवः इति पदस्य कोऽर्थः ?

(ण) कान् न हिंसीः ?

(त) कान् प्राप्य निबोधत ?

**3. बन्धनीमध्यात् रेखाङ्कितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) ऋतस्य पथा प्रेत । (मार्गवाचकशब्दयोगे तृतीया, सहार्थे तृतीया, गत्यर्थकधातुप्रयोगे तृतीया)

(ख) श्रद्धया सत्यमाप्यते । (करणे तृतीया, प्रकृत्यादिभ्यः तृतीया, हेतौ तृतीया)



https://withteachers.in/

(ग) योन ददाति <u>सख्ये</u> । (संप्रदाने चतुर्थी, निवारणार्थे चतुर्थी, रुच्यर्थकधातुयोगे चतुर्थी)

(घ) आरोह <u>तमसो</u> ज्योतिः । (अपादाने पञ्चमी, वारणार्थकधातुयोगे पञ्चमी, ल्यप्लोपे पञ्चमी)

(ङ) <u>विद्यया</u> अमृतमश्नुते । (करणे तृतीया, हेतौ तृतीया, प्रकृत्यादिभ्यः तृतीया)

(च) <u>धर्मात्</u> न प्रमदितव्यम् । (अपादाने पंचमी, भयार्थकधातुयोगे पंचमी, प्रमादार्थकधातुप्रयोगे पंचमी)

(छ) <u>भूत्यै</u> न प्रमदितव्यम् । (निमित्तार्थे चतुर्थी, निवारणार्थे चतुर्थी, सम्प्रदाने चतुर्थी )

(ज) <u>तानि</u> त्वयोपास्यानि । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(झ) मा हिंसीः <u>पुरुषान्</u> पशूंश्च ।

(क्रियाविशेषणे द्वितीया, कर्मणि द्वितीया, गत्यर्थकधातुप्रयोगे द्वितीया ।

(ञ) प्राप्य <u>वरान्</u> निबोधत । (व्याप्त्यर्थे द्वितीया, कर्मणि द्वितीया, कर्मप्रवचनीययोगे द्वितीया ।)

**4. वाक्यनिर्माणं कुरुत ।**

सत्यम्, श्रद्धया, ददाति, अस्तु, धर्मात्, प्राप्य ।

**5. सन्धिविधानं कुरुत ।**

सत्यम् + उपैमि, सत्यम् + आप्यते, चर + एव + इति, स्वाध्यायात् + मा, यानि + अनवद्यानि, पशून् + च, एतत् + अनुशासनम्, एवम् + उपासितव्यम् ।

**6. सन्धिविच्छेदं कुरुत ।**

उपदेशामृतम्, यदनुशासनम्, विज्ञानयुगेऽपि, सद्विप्राः, अहमनृतात्, पुत्रोऽहम्, तन्मे, सत्यान्न, त्वयोपास्यानि, यान्यस्माकम्, एष आदेशः ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत –**

(क) गुरुकुले (गुरोः कुलं तस्मिन्, गुरुः एव कुलं तस्मिन्, गुरुणा कुलं तस्मिन्) ।

(ख) उपदेशः एव अमृतम् (उपदेशामृतेन, उपदेशामृतः, उपदेशामृतम्) ।



https://withteachers.in/

(ग) विज्ञानयुगे (कर्मधारयः, द्विगुः, षष्ठी तत्पुरुषः) ।

(घ) विद्यार्थिनाम् (विद्याम् अर्थयन्ते ये तेषाम्, विद्या एव अर्थाः तेषाम्, विद्यायाः अर्थाः तेषाम्) ।

(ङ) आचार्यः देवः यस्य सः (आचार्यदेवता, आचार्यदेवः, आचार्यदेवी) ।

(च) अनवद्यानि (नञ् तत्पुरुषः, निषेधार्थबहुव्रीहि, कर्मधारयः) ।

(छ) सुशिक्षार्थम् (सुशिक्षायाः इदम्, सुशिक्षायै इदम्, सुशिक्षायै इयम्) ।

(ज) वेदोपनिषत् (वेदश्चासौ उपनिषत् च, वेदौ च उपनिषत् च, वेदाश्चासौ उपनिषत् च ) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) उपदेशः = उप + ________ + घञ् । (दीक्ष् , दिश् , दुष्)

(ख) सूक्ते = सु + ________ + क्त । (उच् , वद् , वच्)

(ग) अनुशासनम् = अनु + शास् + ________ । (शतृ, ल्युट्, शानच् )

(घ) प्राप्य = प्र + आप् + ________ । (क्त, तव्य, ल्यप्)

(ङ) चरन् = चर् + ________ । (क्त्वा, ल्युट्, शतृ)

(च) प्रमदितव्यम् = प्र + मद् + ________ । (तव्य, ल्यप्, क्त्वा)

(छ) प्रवचनाभ्याम् = प्र + वच् + ________ । (ल्युट्, शतृ, शानच्)

(ज) सेवितव्यानि = ________ + तव्य । (सृज् , सेव् , सृ )

(झ) आदेशः = आ + दिश् + ________ । (ल्युट्, शतृ, घञ्)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

आचार्य, गुरु, मनुष्य, पुत्र, पुरुष, सत्, सखि ।

■



https://withteachers.in/

# सुशिष्यः उपमन्युः

S46I3Y

*व्यासदेवविरचितात् महाभारतम् इति आर्षग्रन्थात् इदं कथावस्तु आनीतम् । प्राचीनकालात् प्रचलितः गुरुशिष्ययोः संबन्धः अद्यापि अनुसरणीयः । ''आज्ञा गुरूणामविचारणीया'' इति नीतिरत्र प्रदर्शिता । गुरुभक्तेः शिष्यस्य निष्ठायाः च सुफलमस्यां कथायामनुभूयते ।*

आसीत् धौम्यस्य ऋषेः उपमन्युर्नाम शिष्यः । उपाध्यायस्तं गोरक्षणाय प्रेषयति स्म । स उपाध्यायवचनाद् दिवा गाः रक्षित्वा दिवसक्षये उपाध्यायस्याग्रतः स्थित्वा नमश्चकार ।

गुरुस्तं हृष्टपुष्टं दृष्ट्वा उवाच – ''वत्स ! केन वृत्तिं करोषि ?''

उपमन्युः गुरुं प्रत्यवादीत् – ''भैक्ष्येण वृत्तिं करोमि ।''

तमुपाध्यायः प्रत्युवाच – ''मह्यमनिवेद्य भैक्ष्यं त्वया न भोक्तव्यम् ।''

ततः उपमन्युः 'तथा' इत्युक्त्वा गुरवे सर्वं भैक्ष्यं न्यवेदयत् । उपाध्यायः तस्मादेव सर्वं भैक्ष्यमगृह्णात् ।

अथाऽन्येद्युः सः अहनि गाः रक्षित्वा निशामुखे गुरोः पुरतः स्थित्वा नमश्चकार । तमुपाध्यायः तथापि हृष्टपुष्टं दृष्ट्वा उवाच –''केन इदानीं वृत्तिं करोषि ?'' उपमन्युः उपाध्यायं प्रत्यभाषत ''भवते पूर्वं भैक्ष्यं निवेद्य अपरं चरामि । तेन वृत्तिं करोमि ।''

तं गुरुः प्रत्यवदत् – ''नैतत् न्याय्यम्, एतेन अन्येषां भैक्ष्योपजीविनां वृत्त्युपरोधं करोषि । एवं न कर्त्तव्यम् ।''

अथ उपमन्युः वृत्त्यर्थं यान् यानुपायान् अकरोत्, गुरुस्तं सर्वेभ्यः न्यवारयत् । एवं प्रतिषिद्धः स कदाचिदरण्ये क्षुधार्त्तः भ्रमन् अर्कपत्राण्यभक्षयत् । तैः भक्षितैः दृष्टिहीनः संजातः । ततः स गच्छन् एकस्मिन् कूपे अपतत् ।

अथ तस्मिन् अनागते सूर्ये च अस्तं गते गुरुः अन्यान् शिष्यानवदत् । – ''मया सर्वतः प्रतिषिद्धः स नियतं कुपितः नागच्छति । तस्मात् सोऽन्विष्यताम्'' इत्युक्त्वा शिष्यैः सार्द्धमरण्यं गत्वा तम् आहूतवान् – 'भो ! उपमन्यो ! कुत्रासि ? वत्स ! एहीति ।''

स उपाध्यायस्य वचनं श्रुत्वा प्रत्युवाच – ''अस्मिन् कूपे पतितोऽहम् ।''

उपाध्यायस्तम् अपृच्छत् ''कथं त्वमस्मिन् कूपे पतितोऽसि ?''



https://withteachers.in/

स प्रत्यभाषत –''अर्कपत्राणि भक्षयित्वा नयनाभ्यामन्धः सन् भ्रमन् अस्मिन् कूपे पतितोऽहम् ।

तमुपाध्यायः प्रत्युवाच ''वत्स !अश्विनीकुमारौ प्रार्थयस्व, तौ देवभिषजौ त्वां चक्षुष्मन्तं करिष्यतः ।''

गुरुणा एवमुक्तः स अश्विनीकुमारौ स्तुतवान् ।अथ तस्य स्तुत्या प्रसन्नौ अश्विनीकुमारौ तत्र उपस्थाय उपमन्युं प्राहतुः –

''वत्स ! इममपूपं भक्षय ।''

उपमन्युः अवदत् ''गुरवे अनिवेद्य इममपूपं न भक्षयिष्यामि ।''

अथ अश्विनीकुमारौ आहतुः ''वत्स ! आवां ते अनया गुरुभक्त्या अतीव प्रीतौ स्वः ।चक्षुष्मान् भव ।श्रेयस्ते भविष्यति, यशस्वी भव ।''

ततः उपमन्युः लब्धचक्षुः उपाध्यायं निकषा आगत्य प्राणमत् सर्वमवदच्च ।उपाध्यायः तस्मिन् प्रीतिमान् भूत्वा अवदत् – ''वत्स ! अश्विनीकुमारौ यथा आहतुः तथा ते श्रेयो भविष्यति, सर्वे वेदाः सर्वाणि धर्मशास्त्राणि ते प्रतिभास्यन्ति ।त्वमेव सर्वशास्त्रज्ञः भविष्यसि ।''

उपाध्यायवचनात् उपमन्युः तथैव अभवत् । अतः साधूक्तम्-गुरुभक्त्या किं न सिध्यति ?

**( महाभारतम् )**

## टिप्पणी :

उपाध्यायः – ଗୁରୁ, ଶିକ୍ଷକ । दिवसक्षये – ସନ୍ଧ୍ୟା ସମୟରେ ।नमश्चकार – ନମସ୍କାର କଲେ । भैक्ष्यम् – ଭିକ୍ଷାଲବ୍ଧ (ସଂଗୃହୀତ) ଦ୍ରବ୍ୟ । निवेद्य – ଜଣାଇ, ଦେଇ ।अनिवेद्य – ନ ଜଣାଇ, ନଦେଇ । भैक्ष्योपजीवी – ଭିକ୍ଷାଲବ୍ଧ ଦ୍ରବ୍ୟରେ ଜୀବିକା ନିର୍ବାହ କରୁଥିବା ବ୍ୟକ୍ତି ।वृत्ति – ଜୀବିକା ।वृत्त्युपरोधम् – ବୃତ୍ତିର ବାଧା ।अर्कपत्राणि – ଅରଖଗଛର ପତ୍ରସବୁ ।प्रतिषिद्धः – ନିବାରିତ ।नियतम् – ନିଶ୍ଚୟ । अपूपम् – ପିଷ୍ଟକ, ପିଠା । श्रेयः – ମଙ୍ଗଳ ।लब्धचक्षुः – ଚକ୍ଷୁଲାଭ କରି ।आहतुः – ଦୁହେଁ କହିଲେ । प्रतिभास्यन्ति – ପ୍ରତିଭାତ ହେବ ।

## अभ्यास :

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) उपमन्युः कथं गुरवे सर्वं भैक्ष्यं न्यवेदयत् ?

(ख) ''नैतत् न्याय्यम्'' इति गुरोः कथनस्य कः अभिप्रायः ?



https://withteachers.in/

(ग) उपमन्युः कथं दृष्टिहीनः सन् कूपे अपतत् ?

(घ) केन भावेन उपमन्युः चक्षुर्द्वयं प्राप्तवान् ?

(ङ) प्रीतिमान् उपाध्यायः उपमन्युं किम् अवदत् ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) उपमन्योः गुरोर्नाम किम् ?

(ख) उपाध्यायः गोरक्षणाय कं प्रेषयति स्म ?

(ग) उपमन्युः केन वृत्तिं करोति स्म ?

(घ) सायम् उपमन्युः कुत्र स्थित्वा नमस्करोति स्म ?

(ङ) भैक्ष्येण केषां वृत्त्युपरोधं करोषि इति गुरुः प्रत्यवदत् ?

(च) क्षुधार्त्तः उपमन्युः कानि अभक्षयत् ?

(छ) उपमन्युः गच्छन् कुत्र अपतत् ?

(ज) कैः सार्द्धम् उपाध्यायः वनमगच्छत् ?

(झ) उपमन्युः कौ स्तुतवान् ?

(ञ) कौ देवभिषजौ स्तः ?

(ट) किं साधूक्तम् ?

**3. बन्धनीमध्यात् रेखांकितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत।**

(क) <u>गुरुः</u> तं हृष्टपुष्टं दृष्ट्वा उवाच । (कर्त्तरि प्रथमा, उक्ते कर्मणि प्रथमा, अव्यययोगे प्रथमा)

(ख) <u>गुरवे</u> सर्वं भैक्ष्यं न्यवेदयत् । (निवेदनार्थे चतुर्थी, निमित्तार्थे चतुर्थी, सम्पद्यमाने चतुर्थी ।)

(ग) गुरुस्तं <u>सर्वेभ्यः</u> न्यवारयत् ।

(वारणार्थानामीप्सितः इति पञ्चमी, अपादाने पञ्चमी, निवृत्त्यर्थे पञ्चमी)

(घ) <u>वत्स</u>! इममपूपं भक्षय । (कर्त्तरि प्रथमा, सम्बोधने प्रथमा, अव्यययोगे प्रथमा)

(ङ) श्रेयः <u>ते</u> भविष्यति । (सम्बन्धे षष्ठी, कृत्योगे षष्ठी, अनादरे षष्ठी)



https://withteachers.in/

(च) तस्मात् स: अन्विष्यताम् । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(छ) नयनाभ्याम् अन्धः सन् भ्रमन् अस्मिन् कूपे पतितोऽहम् ।

(अङ्गविकारे तृतीया, सहार्थे तृतीया, ऊनार्थे तृतीया)

(ज) तौ देवभिषजौ त्वां चक्षुष्मन्तं करिष्यतः ।

(कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया, अत्यन्तसंयोगे द्वितीया)

**4. वाक्यरचनां कुरुत ।**

पुरतः, कर्त्तव्यम्, सर्वतः, भ्रमन्, सार्धम्, कुत्र, श्रुत्वा, त्वाम्, अतीव, निकषा ।

**5. सन्धिं कुरुत ।**

उपाध्यायः + तम् , प्रति + अवादीत् , वृत्ति + उपरोधम् , कदाचित् + अरण्ये , यान् + उपायान् , शिष्यान् + अवदत् , नि + अवारयत् , कुत्र + असि, सार्द्धम् + अरण्यम्, प्र + आहतुः, पतितः + असि , तथा + एव , साधु + उक्तम् ,

**6. सन्धिविच्छेदं कुरुत ।**

उपाध्यायस्याग्रतः, नमश्चकार, तस्मादेव, भैक्ष्यमगृह्णात्, नैतत्, गुरुस्तम्, नागच्छति, कदाचिदरण्ये, प्रत्युवाच, सर्वमवदत् , तमुपाध्यायः, प्रत्युवाच ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) गोरक्षणाय (गवां रक्षणं तस्मै, गोभ्यः रक्षणं तस्मै, गोषु रक्षणं तस्मै) ।

(ख) निशायाः मुखं तस्मिन् (निशामुखौ, निशामुखे, निशामुखेन ) ।

(ग) लब्धचक्षुः (अव्ययीभावः, बहुव्रीहिः, तत्पुरुषः ) ।

(घ) क्षुधार्त्तः (क्षुधया ऋतः, क्षुधाम् आर्त्तः, क्षुधायाः आर्तः) ।

(ङ) गुरौ भक्तिः तया (गुरुभक्तेः गुरुभक्तिम्, गुरुभक्त्या) ।

(च) दिवसक्षये (कर्मधारयः, अव्ययीभावः, षष्ठीतत्पुरुषः) ।

(छ) भैक्ष्योपजीविनाम् (भैक्ष्येण उपजीवन्ति ये तेषाम्, भैक्ष्येण जीवन्ति इति तेषाम्, भैक्ष्येण उपजीवति यः तस्य) ।



https://withteachers.in/

(ज) दृष्ट्या हीनः (दृष्टिहीनेन, दृष्टिहीनः दृष्टिहीने) ।

(झ) हृष्टपुष्टम् (बहुव्रीहिः, कर्मधारयः, अव्ययीभावः) ।

(ञ) वृत्त्युपरोधम् (वृत्तेः उपरोधः तम्, वृत्तये उपरोधः तम्, वृत्तौ उपरोधःतम्) ।

(ट) धर्मस्य शास्त्राणि (धर्मशास्त्राणाम्, धर्मशास्त्राणि, धर्मशास्त्रेषु ) ।

(ठ) वृत्त्यर्थम् (अव्ययीभावः, कर्मधारयः, नित्यसमासः) ।

(ड) अर्कपत्राणि (अर्कवृक्षस्य पत्राणि, अर्कस्य पत्राणि, अर्कनामवृक्षस्य पत्राणि) ।

(ढ) उपाध्यायस्य वचनं तस्मात् (उपाध्यायवचनात्, उपाध्यायवचनम्, उपाध्यायवचनानि)

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) वृत्तिम् = ________ + क्तिन् । (वृध्, वृत्, वृ )

(ख) प्रतिषिद्धः = प्रति + सिध् + ________ । (क्त, क्तिन्, क्तवतु)

(ग) कुपितः = ________ + क्त । (कुप् , कु, कुक्)

(घ) उपस्थाय = उप + स्था + ________ । (ल्यप् , शतृ, शानच्)

(ङ) लब्धः = ________ + क्त । (लुभ् , लभ् , लूञ् )

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

उपाध्याय, गुरु, शिष्य, वत्स, भ्रमत्, चक्षुष्मत्, यशस्विन् ।

■



https://withteachers.in/

# वराहोपाख्यानम्

S4FE5L

*बुद्धदेव: बोधिसत्त्व: आसीत् । तस्य बहुविधा: अवतारा: आसन् । बोधिसत्त्वस्य जन्मकथा: जातककथारूपेण परिचिता: । ता: कथा: अतीव नीतिपूर्णा: सन्ति, शिशूनां मनांसि च रञ्जयन्ति । प्रस्तुतं वराहोपाख्यानं जातककथात: संगृह्य सम्पादितम् ।*

पुरासीत् बिन्ध्याद्रेर्गुहायां कश्चित् बुद्धांशसंभवो वराह: सुहृदा मर्कटेन समम् । स सर्वसत्त्वहितकृत् तेन सख्या युत: सदातिथीन् पूजयन् स्वोचितै: नियमै: कालमनयत् । एकदा तत्र पञ्च वासरान् दुर्दिनमभवत् । तत्र अविच्छिन्नजलधारया प्राणिनां यावत् दु:खमभूत्, तन्न केनापि वर्णयितुं शक्यते।

पञ्चमेऽहनि निशि कपिना बन्धुना सहितस्य सुप्तस्य वराहस्य गुहाद्वारि कश्चित् भार्यासुतयुत: सिंह: समाययौ । स सिंहस्तत्र दुर्दिने तां सिंहीमवादीत्, ''प्रिये ! अद्य प्राणिनो यदि न प्राप्नोमि, तदा क्षुधया मरिष्यामि ।'' तदाकर्ण्य सिंही अवोचत् ''नाथ ! सर्वथा एव वयं क्षुधया न जीवाम: । तदेकां मां भुक्त्वा युवां जीवतम् । त्वं हि मे प्रभु:, अयञ्च पुत्र: प्राणभूत: आवयो: सर्वस्वम्, अतो मदीयेन कायेन युवयो: गतिरस्तु ।''

एवमन्योन्यसन्तापं जल्पतोस्तयो: दैवात् प्रबुद्ध: स महाशयो वराह: शुश्राव । स संहृष्ट: अचिन्तयत्, ''दिष्ट्या क्वेयं निशा, क्व च दुर्दिनं, क्व वा ईदृशातिथिलाभ: । अहो मे भाग्यम् ? किमनेन क्षणविनाशिना कुदेहेन ? इमं दत्त्वा अहमतिथीन् तर्पयामि ।'' इत्यालोच्य स वराह: निर्गत्य स्निग्धया गिरा तं सिंहं जगाद, ''भद्र ! मा विषादस्त्वया कार्य: । ससुतस्य सदारस्य ते अहं भक्ष्य: प्राप्त: । तन्मां भुङ्क्ष्व ।''

अथ शूकरेण एवमुक्त: केशरी हृष्ट: भार्यामवादीत् – ''प्रिये ! पूर्वमयं शिशु: भुङ्क्ताम्, ततोऽहं भोक्ष्ये । अनन्तरं त्वं भोक्ष्यसे ।'' तया तथेत्युक्ते पूर्वं सिंहशावकेन भक्षिते तत: सिंह: तस्य क्रोड़स्य मांसानि भोक्तुमुपचक्रमे । भुञ्जानं तं स महासत्त्व: शूकर: प्रोवाच, भद्र ! शीघ्रं मे रक्तं पिब यावत् भूमौ न लीयते । पश्चात् मांसैश्च तृप्यस्व, शेषं ते प्रिया अश्नातु ।''

इति श्रुत्वा सिंहेन क्रमात् भुक्त्वा अस्थिशेषतां नीतोऽपि शूकर: प्राणै: न व्ययुज्यत । अत्रावसरे सा सिंही क्षुधार्त्ता तत्र व्यपद्यत । स च सिंह: ससुत: क्वापि अगात् । रजनी च क्षयमयासीत् ।



https://withteachers.in/

अत्रान्तरे प्रबुद्धः स सखा मर्कटः तं वराहं तथाभूतं दृष्ट्वा ससम्भ्रममप्राक्षीत्, ''सखे ! केन ते इयमवस्था कृता, ब्रूहि यदि ते शक्तिरस्ति ।'' तदाकर्ण्य धीरः स शूकरः अतिकृच्छ्रेण तद् यथावृत्तमवदत् । ततो रुदन् स कपिस्तं पादयोः प्रणिपत्याब्रवीत्, ''सखे ! त्वं देवांशः, येनात्मा तिर्यक्त्वात् मोचितः । किञ्चिदभिलषितं मे ब्रूहि तदहं ते संसाधयामि ।'' इति तेन कपिनोक्तः स वराहः प्रत्यब्रवीत्, ''वयस्य ! यो मे अभिलाषः, स विधिनापि दुःसाध्यः । येन पश्यतो मे इयं तपस्विनी सिंही मृता । इयं पुनः पूर्वाङ्गं संप्राप्य प्राप्तजीविता मां भुक्त्वा तृप्यतु इति मे चेतो वाञ्छति ।''

एवंवादिनं तं धर्मः स्वयं प्रत्यक्षीभूय पाणिना परामृश्य दिव्यदेहं मुनीन्द्रम् उवाच ! ''भद्र! मयैव इयं माया कृता । त्वया नु अखण्डसत्त्वेन परार्थप्राणदायिना मामपि विजित्य धर्मस्य पराकाष्ठा दर्शिता ।''

तदाकर्ण्य स मुनीन्द्रः पुरः स्थितं धर्ममालोक्य अब्रवीत्, - ''देव ! अस्मिन् सख्यौ मर्कटे असन्त्यक्ततिर्य्यक्त्वे इयं प्राप्तापि मुनीन्द्रता न मां प्रीणाति ।'' एतदाकर्ण्य धर्मस्तमपि मर्कटं मुनिमकार्षीत् । महद्भिः सह संगतिः ध्रुवं महते फलाय । अथ स धर्मः तिरोदधे । सा मृता सिंही चान्तर्दधे ।

**(जातककथा)**

## टिप्पणी :

विन्ध्याद्रेः - विन्ध्य + अद्रेः – ବିନ୍ଧ୍ୟପର୍ବତରେ, गुहायाम् – ଗୁମ୍ଫାରେ, गुहाद्वारि – ଗୁମ୍ଫା ଦ୍ୱାରରେ, कायेन – ଶରୀରରେ, जल्पतोः – କଥାବାର୍ତ୍ତା ହେଉଥିବା ଦୁହିଙ୍କର, संहृष्टः – ଖୁସିହୋଇ, प्रबुद्धः – ଜାଗ୍ରତ, दिष्ट्या – ଭାଗ୍ୟବଶତଃ, स्निग्धया गिरा – ସ୍ନେହପୂର୍ଣ୍ଣ କଥାରେ, भुङ्क्ष्व – ଖାଅ, अश्नातु – ଖାଉ ।

## अभ्यास :

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) वराहः केन भावेन समयम् अतिवाहयति स्म ।

(ख) सिंही क्षुधाक्रान्तं सिहं किम् अवदत् ?

(ग) सिंह्याः वाक्यं श्रुत्वा वराहः किम् अचिन्तयत् ?

(घ) वराहः स्नेहपूर्णवाक्येन सिंहं किम् अवदत् ?

(ङ) क्रोड़स्य मांसं भुञ्जानं सिहं महासत्त्वः वराहः किम् उवाच ?



https://withteachers.in/

(च) कपि: कथं वराहस्य पादयो: प्राणमत् ?

(छ) पादयो: प्रणमन्तं कपिं वराह: किं प्रत्यवादीत् ?

(ज) धर्म: प्रत्यक्षीभूय वराहं किम् उवाच ?

(झ) मर्कट: केन भावेन मुनित्वं प्राप्त: ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कस्य पर्वतस्य गुहायां मर्कटेन सह वराह: आसीत् ?

(ख) वराहस्य क: बन्धु: आसीत् ?

(ग) कै: सार्द्धं सिंह: वराहस्य गुहाद्वारम् आगत: ?

(घ) क: प्राणभूत: इति सिंह्या उक्तम् ?

(ङ) क्षुधया मरिष्यामीति क: उक्तवान् ?

(च) कयो: कथोपकथनं वराह: श्रुतवान् आसीत् ?

(छ) वराह: किं दातुं स्थिरीकृतवान् ?

(ज) सिंह: कथम् आनन्दित: आसीत् ?

(झ) वराहस्य मांसं प्रथमत: क: भक्षितवान् ?

(ञ) वराहस्य क्रोडस्य मांसानि केन भक्षितानि ?

(ट) वराह: अस्थिशेषतां कदा प्राप्त: ?

(ठ) वराहस्य चेत: किं वाञ्छति स्म ?

(ड) वराहस्य सम्मुखे क: आविर्भूत: आसीत् ?

(ढ) धर्मस्य पराकाष्ठा केन दर्शिता ?

(ण) धर्म: कं प्राणिनं मुनिम् अकार्षीत् ?

(त) कै: सह संगति: महते फलाय भवति ?



https://withteachers.in/

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) तन्न केनापि वर्णयितुं शक्यते । (प्रयोजनार्थे तृतीया, सहार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया)

(ख) नाथ ! सर्वथा एव वयं क्षुधया न जीवामः ।

(कर्त्तरि प्रथमा, सम्बोधने प्रथमा, अव्यययोगे प्रथमा ।

(ग) किमनेन क्षणविनाशिना कुदेहेन ? (प्रयोजनार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया, हेतौ तृतीया)

(घ) ब्रूहि, यदि ते शक्तिरस्ति । (कृद्योगे षष्ठी, अतसर्थप्रत्यययोगे षष्ठी, सम्बन्धे षष्ठी)

(ङ) शूकरः अतिकृच्छ्रेण तद् यथावृत्तम् अवदत् ।

(हेतौ तृतीया, प्रकृत्यादिभ्यः तृतीया, करणे तृतीया)

(च) भद्र ! मयैव इयं माया कृता । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(छ) धर्मस्तमपि मर्कटं मुनिमकार्षीत् ।

(कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया, अत्यन्तसंयोगे द्वितीया ।)

(ज) महद्भिः सह संगतिः ध्रुवं महते फलाय ।

(अनुक्ते कर्त्तरि तृतीया, सहार्थे तृतीया, प्रयोजनार्थे तृतीया)

**4. वाक्यरचनां कुरुत :**

क्षुधया, अनन्तरम्, मांसैः, इति, अपि, यदि, कपिना, एवम्, मया, विजित्य, पुरः, आकर्ण्य ।

**5. अधोलिखितपदानां सन्धिविधानं कुरुत :**

सदा + अतिथीन्, पञ्चमे + अहनि, तत् + एकम्, अचिन्तयत् + च, इति + आलोच्य, पूर्वम् + अयम्, मांसैः + च, क्व + अपि, इयम् + अवस्था, कपिः + तम्, तत् + अहम्, विधिना + अपि, मया + एव, धर्मम् + आलोक्य, प्राप्ता + अपि,

**6. अधोलिखितपदानां सन्धिविच्छेदं कुरुत ।**

कालमनयत्, सिंहस्तत्र, गतिरस्तु, किमनेन, एवमुक्तः, तातोऽहम्, अत्रावसरे, शक्तिरस्ति, येनात्मा, कपिनोक्तः, पश्यतो मे, मामपि, मुनिमकार्षीत्, चान्तर्दधे ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/ समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) गुहाद्वारि (गुहायाः द्वारं तस्मिन्, गुहायाः द्वाः तस्याम्, गुहायाः द्वाः तस्याः) ।



https://withteachers.in/

(ख) जलस्य धारा तया (जलधारेण, जलधारया, जलधारायाः) ।

(ग) यथावृत्तम् (बहुव्रीहिः, कर्मधारयः, अव्ययीभावः) ।

(घ) बिन्ध्यो नाम अद्रिः तस्य (बिन्ध्याद्रौ, बिन्ध्याद्रेः, बिन्ध्याद्रिः) ।

(ङ) महाशयः (महान् आशयः यस्य सः, महतः आशयस्य सः, महताम् आशयः) ।

(च) सदारः (सहार्थ बहुव्रीहिः, कर्मधारयः, अव्ययीभावः) ।

(छ) सिंहशावकेन (सिंहस्य शावकः तेन, सिंह्याः शावकः तेन, सिंहाय शावकः तेन) ।

(ज) न खण्डम् (नास्तिखण्डम्, अखण्डः, अखण्डम्) ।

(झ) महान् चासौ सत्त्वः चेति (बहुव्रीहिः, कर्मधारयः, तत्पुरुषः) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) पूजयन् = पूज् + ______ । (स्वार्थे णिच् शतृ, शतृ, ल्युट्)

(ख) भुक्त्वा = ______ + क्त्वा । (भुज् , भुञ्ज् , भोज्)

(ग) संहृष्टः = सम् + हृष् + ______ । (क्त, घञ् , शतृ)

(घ) लाभः = लभ् + ______ । (शानच् , घञ् , तुमुन्)

(ङ) निर्गत्य = निः + गम् + ______ । (क्त, शतृ, ल्यप् )

(च) प्रबुद्धः = प्र + बुध् + ______ । (क्तिन् , क्त, शतृ)

(छ) रुदन् = ______ + शतृ । (रोद् , रुद् , रुध् )

(ज) प्रणिपत्य = प्र + नि + ______ + ल्यप् । (पत् , पा, पुष् )

(झ) परामृश्य = परा + ______ + ल्यप् । (मृ, मृश्, मा)

(ञ) विजित्य = वि + ______ + ल्यप् । (जै, जि, जुत्)

(ट) दर्शिता = दृश् + णिच् + ______ + टाप् । (अनीय, क्त, क्तवतु)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

सुत, शूकर, केशरिन्, सखि, कपि, तपस्विन्, जीवित, मुनि, कृत ।

■



https://withteachers.in/

# सिंहशृगालशिशुकथा

S4PA79

*मित्रभेद-मित्रसंप्राप्ति-काकोलूकीय-लब्धप्रणाश– अपरीक्षितकारकमिति पञ्चभिः भागैः 'पञ्चतन्त्रम्' नाम गद्यकाव्यमतीव लोकप्रियमस्ति । सुप्रख्यातकविना प्रचण्डपण्डितविष्णुशर्मणा विरचिते अस्मिन् ग्रन्थे मनुष्येतरचरित्रमवलम्ब्य बहवः नीतिपूर्णकथाः लिखिताः । तासु कथासु लब्धप्रणाशं नाम चतुर्थतन्त्रस्य पञ्चमी कथेयं सिंह-शृगालशिशु-कथा अन्यतमा।*

*शिशुःपालनीयः न तु वध्यः इति शिक्षां दातुं तथा सिंहशृगालशिशुचरित्रमाध्यमेन बालानां मनोरञ्जनार्थं कथेयं प्रदत्ता ।*

कस्मिंश्चिद् देशे सिंहदम्पती प्रतिवसतः स्म । अथ सिंही पुत्रद्वयमजीजनत्, सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति । अन्यस्मिन्नहनि तेन किमपि सत्त्वं नासादितम् । वने भ्रमतोऽपि तस्य रविरस्तं गतः । अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः । तं च बालोऽयमिति अवधार्य यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान् । ततः सिंह्याऽभिहितम्- ''भो कान्त ! त्वयानीतं किञ्चिदस्माकं भोजनम् ?'' सिंह आह– ''प्रिये ! मया अद्य एनं शृगालशिशुं परित्यज्य न किञ्चित् सत्त्वं समासादितम्, स च बालोऽयमिति मत्वा न व्यापादितः । इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु । प्रभातेऽन्यत् किञ्चित् उपार्जयिष्यामि।'' सा प्राह - ''भो कान्त ! त्वया बालोऽयं विचिन्त्य न हतः । तत् कथमेतमहं स्वोदरार्थे विनाशयामि । उक्तञ्च –

अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं परित्याज्यं धर्म एष सनातनः ।।

तस्मान्ममायं तृतीयः पुत्रो भविष्यति ।'' इत्येवमुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत् । एवं ते त्रयोऽपि शिशवः परस्परं जातिविशेषमजानन्तः एकाचारविहारा बाल्यसमयं निर्वाहयन्ति स्म । अथ कदाचित् तत्र वने भ्रमन्नरण्यगजः समायातः । तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति यावत् प्रचलितौ तावत्तेन शृगालसुतेन अभिहितम् – ''अहो गजोऽयं युष्मत्कुलशत्रुः तन्न गन्तव्यमेतस्य अभिमुखम्।'' एवमुक्त्वा गृहं प्रधावितः । तावपि ज्येष्ठबान्धवस्य भङ्गात् निरुत्साहतां गतौ ।



https://withteachers.in/

अथ तौ द्वावपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः– यथा स गजं दृष्ट्वा दूरतोऽपि नष्टः । सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुरिताधरः ताम्रलोचनः तौ निर्भर्त्सयमानःपरुषतरवचनानि उवाच । ततः सिंह्या एकान्ते नीत्वा असौ प्रबोधितः ''वत्स ! एवं कदाचित् मा जल्प । एतौ भवदीयलघुभ्रातरौ ।'' अथासौ प्रभूतकोपाविष्टः तामुवाच – ''किमहमेताभ्यां शौर्येण रूपेण विद्याभ्यासेन कौशलेन वा हीनो येन मामुपहसतः । तन्मया अवश्यमेतौ व्यापादनीयौ ।'' तदाकर्ण्य सिंही तस्य जीवितमिच्छन्ती अन्तर्विहस्य प्राह–

''शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ! ।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ।।''

''तत् सम्यक् शृणु । वत्स ! त्वं शृगालीसुतः । कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः । तद् यावत् एतौ मत्पुत्रौ शिशुत्वात् त्वां शृगालं न जानीतः, तावत् द्रुततरं गत्वा स्वजातीयानां मध्ये भव । नोचेदेताभ्यां हतो मृत्युपथं समेष्यसि ।'' सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः ।

## टिप्पणी :

**सिंहदम्पती** – ସିଂହ ଓ ସିଂହୀ । **व्यापाद्य** – ହତ୍ୟାକରି । **सत्त्वम्** – ଜୀବ । **वने भ्रमतोऽपि तस्य** – ସେ ବଣରେ ବୁଲୁବୁଲୁ । **भ्रमतोऽपि तस्य** – ଅନାଦରେ ୬ଷ୍ଠୀ । **भ्रमतः** – ଭ୍ରମ୍ + ଶତୃ । **आसादितम्** – ପ୍ରାପ୍ତ ହେଲା/ପାଇଲା । **अवधार्य** – ବିଚାରକରି / ଧାରଣା କରି / ଭାବି । **दंष्ट्रामध्यगतं कृत्वा** – ଦନ୍ତର ମଧ୍ୟରେ ରଖି । **सिंह्यै** – ସିଂହୀକୁ (ସଂପ୍ରଦାନେ ୪ର୍ଥୀ) । **परित्यज्य** – ଛାଡ଼ି / ବ୍ୟତୀତ । **पथ्यम्** – ଖାଦ୍ୟ / ପଥି । **स्वोदरार्थे** – ନିଜପେଟ ପାଇଁ । **अकृत्यम्** – ଅକାର୍ଯ୍ୟ । **प्राणत्यागेऽपि संस्थिते** – ପ୍ରାଣ ଗଲେ ବି (ଭାବେ ୭ମୀ) । **कृत्यम्** – କରଣୀୟ । **स्वस्तनक्षीरेण** – ନିଜସ୍ତନ୍ୟପାନ ଦ୍ୱାରା (କରଣେ ୩ୟା) । **पुष्टिमनयत्** – ବଢ଼ାଇଲା । **अजानन्तः** – ନ ଜାଣି । **भ्रमन्** – ବୁଲିବୁଲି । **अरण्यगजः** – ବଣୁଆ ହାତୀଟିଏ । **अभिमुखम्** – ସମ୍ମୁଖକୁ । **अभिहितम्** – କହିଲା। **ज्येष्ठबान्धवभङ्गात्** – ବଡ଼ଭାଇର ପଳାୟନ (ପୃଷ୍ଠଭଙ୍ଗ) ହେତୁ (ହେତୌ ୫ମୀ) । **विहसन्तौ** – ଦୁହେଁ ହସି ହସି । **परुषतरवचनानि** – କଟୁବଚନ । **प्रबोधितः** – ବୁଝାଇଲା । **लघुभ्रातरौ** – ସାନଭାଇ ଦୁହେଁ । **शौर्येण** – ବୀରତ୍ୱରେ । **व्यापादनीयौ** – ଦୁହେଁ ମରାଯିବାର ଯୋଗ୍ୟ। ମାରିଦେବି । **आकर्ण्य** – ଶୁଣି । **जीवितमिच्छन्ती** – ଜୀବନକୁ / ବଞ୍ଚିବାକୁ ଇଚ୍ଛା କରୁଥିବା । **अन्तर्विहस्य** – ମନେ ମନେ ହସି । **कृतविद्यः** – ଜ୍ଞାନୀ । **दर्शनीयः** – ସୁନ୍ଦର । **उत्पन्नः** – ଉତ୍ପନ୍ନ / ଜାତ ହୋଇଅଛ । **हन्यते** – ମରାଯାଏ ।



https://withteachers.in/

## अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) शृगालशिशुं प्राप्य सिंहः किमकरोत् ?

(ख) भोजनविषये सिंहः सिंहीं किमुक्तवान् ?

(ग) कथं सिंही शृगालशिशुं न हतवती ?

(घ) कस्तावत् सनातनः धर्मः ?

(ङ) सिंही शृगालशिशुं कथं पालितवती ?

(च) त्रयोऽपि शिशवः कथं बाल्यसमयं निर्वाहयन्ति स्म ?

(छ) अरण्यगजं दृष्ट्वा शृगालशिशुः किमभिहितवान् ?

(ज) कथं सिंहसुतौ निरुत्साहतां गतौ ?

(झ) कथं शृगालशिशुः कोपाविष्टमनाः अभवत् ?

(ञ) कथं शृगालशिशुः परुषतरवचनानि उवाच ?

(ट) सिंही एकान्ते नीत्वा शृगालशिशुं किमुक्तवती ?

(ठ) प्रभूतकोपाविष्टः शृगालः सिंहीं किमुवाच ?

(ड) सिंही अन्तर्विहस्य किं प्राह ?

(ढ) कथं शृगालशिशुः स्वजात्या मिलितः ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) सिंहः नित्यं सिंह्यै किं ददाति ?

(ख) कदा रविरस्तं गतः ?

(ग) कथं सिंहः शृगालशिशुं जीवन्तमेव समर्पितवान् ?

(घ) कदा अकृत्यं नैव कर्त्तव्यम् ?

(ङ) त्रयोऽपि शिशवः कम् अजानन्तः एकाचारविहाराः बाल्यसमयं निर्वाहयन्ति स्म ?



https://withteachers.in/

(च) सिंहसुतौ गृहं प्राप्य पित्रोरग्रतः किम् अवदताम् ?

(छ) गजः कुत्र न हन्यते ?

(ज) शृगालशिशुः भयव्याकुलमनाः किम् अकरोत् ?

**3. बन्धनीमध्यात् रेखाङ्कितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) सिंहोऽपि मृगान् व्यापाद्य <u>सिंह्यै</u> ददाति । (दानार्थे चतुर्थी, निमित्तार्थे चतुर्थी, निवेदनार्थे चतुर्थी)

(ख) <u>तेन</u> किमपि नासादितम् । (अनुक्ते कर्त्तरि तृतीया, करणे तृतीया, सहार्थे तृतीया)

(ग) वने भ्रमतोऽपि <u>तस्य</u> राविरस्तं गतः । (अनादरे षष्ठी, सम्बन्धविवक्षायां षष्ठी, सम्बन्धे षष्ठी)

(घ) त्वम् <u>एनं</u> भक्षयित्वा पथ्यं कुरु ।

(कर्मणि द्वितीया, प्रतिशब्दयोगे द्वितीया, क्रियाविशेषणे द्वितीया।)

(ङ) तेन <u>शृगालसुतेन</u> अभिहितम् ।

(अनुक्ते कर्त्तरि तृतीया, प्रयोजनार्थे तृतीया, प्रकृत्यादिभ्यः तृतीया)

(च) तौ <u>पित्रोः</u> अग्रतः ऊचतुः । (अग्रतः शब्दयोगे षष्ठी, सम्बन्धे षष्ठी, कृद्योगे षष्ठी)

(छ) किमहमेताभ्यां <u>रूपेण</u> हीनः ।

(ऊनार्थकशब्दयोगे तृतीया, अनुक्ते कर्त्तरि तृतीया, प्रयोजनार्थे तृतीया)

(ज) तत् <u>मया</u> अवश्यमेतौ व्यापादनीयौ । (सहार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया, हेतौ तृतीया)

(झ) <u>गजः</u> तत्र न हन्यते । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(ञ) <u>कृपया</u> मया स्वस्तनक्षीरेण पुष्टिं नीतः ।

(प्रकृत्यादिभ्यः तृतीया, हेतौ तृतीया, अनुक्ते कर्त्तरि तृतीया)

**4. वाक्यरचनां कुरुत ।**

अपि, ददाति, किञ्चित् , कदाचित्, तेन, हीनः, सम्यक्, कृपया, नोचेत्, स्वजात्या ।



https://withteachers.in/

**5. सन्धिविधानं कुरुत ।**

नित्यम् + एव , भ्रमतः + अपि, प्रभाते + अन्यत् , बालः + अयम् , सिंहः + आह, उक्तम् + च, धर्मः + एषः, मम + अयम्, अथ + असौ, माम् + उपहसतः, अवश्यम् + एतौ, निः + उत्साहताम्, अन्तः + विहस्य, त्वम् + उत्पन्नः, यावत् + मे, सः + अपि ।

**6. अधोलिखितपदानां सन्धिविच्छेदं कुरुत ।**

सिंहोऽपि, रविरस्तम्, अन्यस्मिन्नहनि, जीवन्तमेव, त्वयानीतम्, त्वमेनम्, त्रयोऽपि, नैव, भ्रमन्नरण्यगजः, द्वावपि, तावत्तेन, एवमुक्त्वा, तन्न, तावपि, पित्रोरग्रतः, दूरतोऽपि, मैवम्, तन्मया, तदाकर्ण्य, सुरोऽसि, गजस्तत्र, शनैरपसृत्य ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) पुत्रद्वयम् (पुत्राणां द्वयम्, पुत्रयोः द्वयम्, पुत्रेभ्यः द्वयम्) ।

(ख) शृगाल्याः शिशुः (शृगालीशिशुः, शृगालशिशुः, शृगालशिशुना) ।

(ग) दम्पती (द्वन्द्वः, कर्मधारयः, द्विगुः ) ।

(घ) प्राणत्यागे (प्राणस्य त्यागः तस्मिन्, प्राणानां त्यागः तस्मिन्, प्राणेभ्यः त्यागःतस्मिन्) ।

(ङ) माता च पिता च तयोः (पितुः, पित्रोः, पितॄणाम्) ।

(च) मत्पुत्रौ (मम पुत्रौ, मदीयौ पुत्रौ, मह्यं पुत्रौ) ।

(छ) कोपेन आविष्टः (कोपाविष्टेन, कोपाविष्टः, कोपाविष्टस्य) ।

(ज) मृत्युपथम् (द्विगुः, कर्मधारयः, षष्ठीतत्पुरुषः) ।

(झ) अकृत्यम् (नास्ति कृत्यम्, न कृत्यम्, न एव कृत्यम्) ।

(ञ) विद्यायाः अभ्यासः तेन (विद्याभ्यासः, विद्याभ्यासेन, विद्याभ्यासस्य) ।

(ट) प्रस्फुरितः अधरःयस्य सः (बहुव्रीहिः, कर्मधारयः, द्विगुः) ।



https://withteachers.in/

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) भ्रमतः = भ्रम् + _____ । (शतृ, ल्युट् , अनीय)

(ख) प्राप्तः = प्र + आप् + _____ । (क्तवतु, क्त, क्त्वा)

(ग) कृत्वा = _____ + क्त्वा । (कृ, कृत् , कृष् )

(घ) अभिहितम् = अभि + _____ + क्त । (हा, धा, दा)

(ङ) आनीतम् = आ + नी + _____ । (क्त, ल्यप्, क्तवतु)

(च) भोजनम् = _____ + ल्युट् । (भुज् , भोज् , भृज् )

(छ) मत्वा = _____ + क्त्वा । (मा, मन् , मृ)

(ज) त्यागः = त्यज् + _____ । (क्त, शतृ, घञ् )

(झ) हीनः = _____ + क्त । (धा, हा, स्था)

(ञ) नष्टः = _____ + क्त । (नश् , नस् , नम् )

(ट) उत्पन्नः = उत् + पद् + _____ । (क्त, ल्युट्, शानच् )

(ठ) हतः = _____ + क्त । (हा, धा, हन् )

(ड) अपसृत्य = अप + सृ + _____ । (क्त, ल्यप्, शतृ)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

सिंह, शृगाल, पुत्र, मृग, हत, तृतीय, इच्छत् ।

■



https://withteachers.in/

# बककुलीरककथा

S4Y68H

*पञ्चतन्त्रं नाम संस्कृतवाङ्मयस्य नीतिसंवलितं कथासाहित्यम् अतीव लोकप्रसिद्धम् । नीतिविशारदेन पण्डितविष्णुशर्मणा इदं विरचितम् । पञ्चतन्त्रस्य मित्रभेदो नाम प्रथमतन्त्रम् । तत्र सप्तमी कथेयं भवति बककुलीरक-कथा । कथाकार: कथामाध्यमेन बालानां मनोरञ्जनं करोति । अतिलोभ: मृत्यो: कारणमिति नीतिशिक्षा अत्र प्रदीयते ।*

अस्ति कस्मिंश्चित् वनप्रदेशे नानाजलचरयुक्तं महत् सर: । तत्र च कृताश्रय: कश्चित् बको वृद्धभावमुपागतो मत्स्यान् व्यापादयितुमसमर्थ: । ततश्च क्षुत्क्षामकण्ठ: सरस्तीरे उपविष्ट: अश्रुप्रवाहै: धरातलमभिषिञ्चन् रुरोद ।

अथ कश्चित् कुलीरको बहुजलचरसमेत: समेत्य तस्य दु:खेन दु:खित: सादरम् इदमूचे - ''माम ! किमद्य त्वया नाहारवृत्ति:अनुष्ठीयते ? केवलमश्रुपूर्णनेत्राभ्यां सनि:श्वासेन स्थीयते ?''

बक आह - ''वत्स ! सत्यमुपलक्षितं भवता । मया हि मत्स्यादनं प्रति परमवैराग्येण सांप्रतं प्रायोपवेशनं कृतम् । तेनाहं समीपगतानपि मत्स्यान् न भक्षयामि ।'' कुलीरकस्तत् श्रुत्वा प्राह - ''माम ! किं तद्वैराग्यकारणम् ?'' स आह – ''वत्स ! अहमस्मिन् सरसि जातो वृद्धिं गतश्च । तत् मयैतत् श्रुतं यद् द्वादशवार्षिकी अनावृष्टि: सम्पद्यते ।'' कुलीरक आह – ''कस्मात् श्रुतम् ?'' बक आह – ''दैवज्ञमुखात् । तदेतत् सर: स्वल्पतोयं वर्त्तते । शीघ्रं शुष्कतां यास्यति । अस्मिन् शुष्के यै: सहाहं वृद्धिं गत: सदैव क्रीड़ितश्च, ते सर्वे तोयाभावात् नाशं यास्यन्ति । तत्तेषां वियोगं द्रष्टुमसमर्थ: । तेनैतत् प्रायोपवेशनं कृतम् । अपि च साम्प्रतं सर्वेषां स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वस्वजनै: नीयन्ते । अत्र पुन: सरसि ये जलचरास्ते निश्चिन्ता: सन्ति ।''

तत: कुलीरक:तदाकर्ण्य अन्येषां जलचराणां तत्तस्य वचनं निवेदयामास । अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयो बकमभ्युपेत्य पप्रच्छु: – ''माम ! अस्ति कश्चिदुपायो येनास्माकं रक्षा भविष्यति ?'' बक आह – ''अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलपूर्णं सर: । तत् यदि मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि ।''



https://withteachers.in/

अथ सर्वे जलचराः तत्र विश्वासमापन्नाः तात, मातुल, भ्रात इति ब्रुवाणाः 'अहं पूर्वमहं पूर्वम्' इति समन्तात् परिवृताः । सोऽपि दुष्टाशयः क्रमेण तान् पृष्ठे आरोप्य जलाशयस्य नातिदूरे शिलायामाक्षिप्य स्वेच्छया अभक्षयत् । ततो भूयोऽपि जलाशयं समासाद्य जलचराणां मिथ्यावार्त्तया मनांसि रञ्जयन् नित्यमेव आहारवृत्तिमकरोत् ।

अन्यस्मिन् दिने कुलीरकेणोक्तम् – ''माम ! मया सह ते प्रथमः स्नेहसंभाषः संजातः । तत् किं मां परित्यज्य अन्यान् नयसि ? तस्मादद्य मे प्राणत्राणं कुरु ।'' तदाकर्ण्य सोऽपि दुष्टाशयःचिन्तितवान्, ''निर्विण्णोऽहं मत्स्यादनेन । तदद्य एनं कुलीरकं व्यञ्जनस्थाने करोमि ।'' एवं विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः ।

कुलीरकोऽपि दूरादेव अस्थिपर्वतमवलोक्य मत्स्यास्थीनि इति परिज्ञाय तमपृच्छत् – ''माम ! कियद्दूरे स जलाशयः ? मदीयभारेणातिश्रान्तः त्वम् । तत् कथय ।'' सोऽपि मन्दधीः जलचरोऽयमिति मत्वा स्थले न प्रभवति इति सस्मितम् इदमाह, ''कुलीरक ! कुतोऽन्यः जलाशयः । मम प्राणयात्रेयम् । तस्मात् स्मर्यतामभीष्टदेवता । त्वामपि अस्यां शिलायां निक्षिप्य भक्षयिष्यामि ।''

एतच्छ्रुत्वा कुलीरकेण स्ववदनदंशद्वयेन मृदुग्रीवायां पापाशयो बको गृहीतो मृतश्च । अथ स तां बकग्रीवां समादाय शनैः शनैः तज्जलाशयम् आससाद । ततः सर्वैरेव जलचरैः पृष्टः – ''भोः कुलीरक ! किं निवृत्तस्त्वम् ? स मातुलोऽपि नायातः । तत् किं चिरयति ? वयं सर्वे सोत्सुकाः तिष्ठामः ।'' एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच – ''मूर्खाः सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः । तत् मया आयुःशेषतया तस्य विश्वासघातकस्य अभिप्रायं ज्ञात्वा ग्रीवेयम् आनीता । तदलं संभ्रमेण । अधुना सर्वजलचराणां क्षेमं भविष्यति ।''

**( पञ्चतन्त्रम् )**

## टिप्पणी

**सरः** – ପୁଷ୍କରିଣୀ, **क्षुत्क्षामकण्ठः** – କ୍ଷୁଧାତୁରକଣ୍ଠ ହୋଇଥିବା, ଭୋକିଲା, **अश्रुप्रवाहैः** – ଲୋତକଧାରରେ, **अभिषिञ्चन्** – ଓଦାକରି କରି, **रुरोद** – କାନ୍ଦୁଥିଲା । **समेत्य** – ଆସି, ପହଞ୍ଚି, **मत्स्यादनम्** – ମତ୍ସ୍ୟଭୋଜନ, **परमवैराग्येण** – ଅତିଶୟ ବିରାଗ ହେତୁ, **प्रायोपवेशनम्** – ଅନଶନ **सरसि** – ପୋଖରୀରେ, **दैवज्ञमुखात्** – ଜ୍ୟୋତିଷମୁଖରୁ, **पृष्ठम्** – ପିଠି, **दुष्टाशयः** – ଦୁଷ୍ଟଚିତ୍ତବୃତ୍ତିସଂପନ୍ନ । **निर्विण्णः** – ଚିଟା / ବିରକ୍ତ, **व्यञ्जनस्थाने** – ତରକାରୀ ସ୍ଥଳରେ,



https://withteachers.in/

समारोप्य – ଆରୋପଣ କରି / ରଖି, उद्दिश्य – ଲକ୍ଷ୍ୟକରି, परिज्ञाय – ଜାଣି, अतिश्रान्तः – କ୍ଳାନ୍ତ । प्राणयात्रा – ବଞ୍ଚିବା ପାଇଁ ମାଧ୍ୟମ, स्मर्यताम् – ସ୍ମରଣ କର । मृदुग्रीवायाम् – କୋମଳ ବେକକୁ, आससाद – ପହଞ୍ଚିଲା । सोत्सुकाः – ଉତ୍କଣ୍ଠିତ । वञ्चयित्वा – ଠକାଇ, प्रक्षिप्य – ପକାଇ / ଛେଚି, सम्भ्रमेण – ଆଶଙ୍କା ସନ୍ଦେହ, क्षेमम् – କଲ୍ୟାଣ ।

## अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) कथं बकः सरस्तीरे उपविष्टः अरुदत् ?

(ख) कुलीरको बहुजलचरसमेतः समेत्य बकं किम् उक्तवान् ?

(ग) बकः वैराग्यस्य कारणं केन प्रकारेण अकथयत् ?

(घ) जलचराणां रक्षार्थं बकः कम् उपायम् उक्तवान् ?

(ङ) बकः केन उपायेन नित्यम् आहारवृत्तिम् अकरोत् ?

(च) कुलीरकस्य वचनं श्रुत्वा दुष्टाशयः बकः किं चिन्तितवान् ?

(छ) कुलीरकः अस्थिपर्वतम् अवलोक्य बकं किम् अपृच्छत् ?

(ज) बकः सस्मितं किमाह ?

(झ) कुलीरकेण कथं बको व्यापादितः ?

(ञ) कुलीरकः बकं हत्वा किम् अकरोत् ?

(ट) कुलीरको विहस्य किम् उवाच ?

(ठ) कथं सर्वजलचराणां क्षेमम् अभवत् ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कथं बकः मत्स्यान् व्यापादयितुम् असमर्थः अभवत् ?

(ख) कः बकस्य दुःखेन दुःखितः अभवत् ?



https://withteachers.in/

(ग) कथं बकेन प्रायोपवेशनं कृतम् ?

(घ) बकः दैवज्ञमुखात् किम् अशृणोत् ?

(ङ) केषां वियोगं द्रष्टुं बकः असमर्थः इति उक्तवान्?

(च) अत्र सरसि के निश्चिन्ताः सन्ति ?

(छ) मत्स्यकच्छपप्रभृतयो बकम् अभ्युपेत्य किम् अपृच्छन् ?

(ज) बकः जलचरान् केन भावेन अभक्षयत् ?

(झ) बकः केन निर्विण्णः अभवत् ?

(ञ) बकः कुलीरकं पृष्ठे समारोप्य कुत्र प्रस्थितः ?

(ट) बकस्य ग्रीवा कीदृशी आसीत् ?

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) त्वया नाहारवृत्तिः अनुष्ठीयते । (अनुक्ते कर्त्तरि तृतीया, करणे तृतीया, प्रयोजनार्थे तृतीया)

(ख) सत्यमुपलक्षितं भवता । (ऊनार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया, अङ्गविकारे तृतीया)

(ग) तेनाहं समीपगतानपि मत्स्यान् न भक्षयामि ।

(क्रियाविशेषणे द्वितीया, कर्मणि द्वितीया, प्रतिशब्दयोगे द्वितीया)

(घ) अहमस्मिन् सरसि जातः । (स्थानाधिकरणे सप्तमी, भावे सप्तमी, अवच्छेदे सप्तमी)

(ङ) यैः सहाहं वृद्धिंगतः । (अनुक्ते कर्त्तरि तृतीया, सहार्थे तृतीया, हेतौ तृतीया)

(च) सोऽपि स्वेच्छया अभक्षयत् । (प्रकृत्यादिभ्यः तृतीया, सहार्थे तृतीया, हेतौ तृतीया)

(छ) तस्मात् अद्य मे प्राणत्राणं कुरु । (अपादाने पञ्चमी, हेतौ पञ्चमी, ल्यप्लोपे पञ्चमी)

(ज) तदलं संभ्रमेण । (हेतौ तृतीया, वारणार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया )

(झ) तदहं तं तत्र नयामि । (कर्मणि द्वितीया, व्याप्त्यर्थे द्वितीया, क्रियाविशेषणे द्वितीया)



https://withteachers.in/

**4.** **वाक्यरचनां कुरुत ।**

सादरम्, सह, स्वेच्छया, त्वाम्, श्रुत्वा, शनैः, अलम्, क्षेमम् ।

**5.** **अधोलिखितपदानां सन्धिविधानं कुरुत ।**

ततः + च, सत्यम् + उपलक्षितम्, सदा + एव, तत् + एतत्, येन + अस्माकम्, तत् + तेषाम्, तेन + एतत्, अस्ति + अस्य, विहस्य + उवाच, तस्मात् + अधः, तम् + अपृच्छत्, त्वाम् + अपि, तत् + जलाशयम्, सम् + आदाय, मातुलः + अपि, तत् + अलम् ।

**6.** **अधोलिखितपदानां सन्धिविच्छेदं कुरुत ।**

कस्मिंश्चित्, कश्चित्, सरस्तीरे, किमद्य, मत्स्यादनम्, प्रायोपवेशनम्, कुलीरकस्तत्, प्राह, अहमस्मिन्, गतश्च, मयैतत्, सहाहम्, क्रीडितश्च, जलचरास्ते, तत्तस्य, तदहम्, पूर्वमहम्, भूयोऽपि, कुलीरकेणोक्तम्, कुतोऽन्यः, प्राणयात्रेयम्, एतच्छ्रुत्वा, मृतश्च, सर्वैरेव, निवृत्तस्त्वम्, नायातः, तैरभिहिते, जलचरास्तेन, नातिदूरे, ग्रीवेयम्।

**7.** **बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) नानाजलचरयुक्तम् (नानाजलचराणां युक्तम्, नानाजलचरैः युक्तम्, नानाजलरेषु युक्तम्)

(ख) सरसःतीरं तस्मिन् (सरस्तीरम्, सरस्तीरे, सरस्तीरात् ।)

(ग) कृताश्रयः (कर्मधारयः, बहुव्रीहिः, द्वन्द्वः) ।

(घ) वैराग्यकारणम् (वैराग्यम् एव कारणम्, वैराग्यस्य कारणम्, वैराग्यात् कारणम्)

(ङ) निर्गता चिन्ता येषां ते (हीनचिन्ताः, विचिन्ताः, निश्चिन्ताः) ।

(च) मन्दधीः (तत्पुरुषः, अव्ययीभावः, बहुव्रीहिः )

(छ) जलचराः (जलं चरन्ति ये, जले चरन्ति ये, जलेन चरन्ति ये ) ।

(ज) शिलायाः तलं तस्मिन् (शिलातलम्, शिलातले,शिलातलात्)।

(झ) अश्रुप्रवाहैः (बहुव्रीहिः, षष्ठीतत्पुरुषः, द्विगुः) ।



https://withteachers.in/

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) युक्तम् = युज् + ____ । (क्त, क्तवतु, शतृ)

(ख) उपविष्टः = उप + ____ + क्त । (विश् , वस् , वृष्)

(ग) समेत्य = सम् + आ + ____ + ल्यप् । (इ, एध, आप्)

(घ) अदनम् = ____ + ल्युट् । (अद्, आद्, दा)

(ङ) जातः = ____ + क्त । (जै, जन्, ज्या)

(च) वृद्धिः = वृध् + ____ । (क्तिन्, ल्युट्, शानच्)

(छ) द्रष्टुम् = दृश् + ____ । (तुमुन्, शतृ, ल्युट्)

(ज) वचनम् = ____ + ल्युट् । (वच्, वद्, वृत्)

(झ) निर्विण्णः = निर् + विद् + ____ । (घञ्, शानच्, क्त)

(ञ) उद्दिश्य = उत् + ____ + ल्यप् । (दिश्, दृश्, दा)

(ट) प्रस्थितः = प्र + ____ + क्त । (स्था, मा, स्तृ)

(ठ) परिज्ञाय = परि + ज्ञा + ____ । (क्त, ल्यप्, शतृ)

(ड) आयातः = आ + ____ + क्त । (दा, इ, या)

(ढ) अभिहितः = अभि + ____ + क्त । (हा, ह्, धा)

(ण) विहस्य = वि + हस् + ____ । (घञ्, ल्युट्, ल्यप्)

**9. स्त्रीप्रत्यये रूपाणि लिखत –**

मत्स्य , जात , चिन्तितवत् , जलचर, मृदु , मातुल , मिथ्यावादिन् , आनीत ।

■



https://withteachers.in/

# जन्मवर्वरकथा

S582AJ

*आत्मप्रशंसया पुलकितो जनः शास्त्रज्ञानात् न विरतो भवेत् । शास्त्रानुसारिणी यथार्थविवेचना सर्वत्र करणीया, नोचेत् जनः उपहासस्य पात्रं भवेत् । शास्त्रं जानन् अपि बुद्धिहीनः जनः जीवने सफलतां न प्राप्नोति ।*

आसीत् कौशाम्बी नाम नगरी । तत्र देवधरनामा गणकः प्रतिवसति स्म । तस्य शान्तिधरो नाम पुत्रो बभूव । स च जन्मवर्वरः पित्रा गुणिना प्रयत्नेन पाठ्यमानः पदार्थं नाधिगच्छति ।

तथापि लोकद्वयप्रत्याशाङ्कुरः सकलमनोरथस्थानम् एक एव तस्य पुत्रः । स्नेहाधिक्यात् स तं यत्नेन पाठयति स्म । ततो महता समयेन महता च पितुः श्रमेण स शुकवदभ्यस्तशास्त्रः अभवत् ।

तमधिगतशास्त्रं कृत्वा गणकश्चिन्तितवान् । ''यदेनं राज्ञः परिचितगुणं करोमि ।'' ततः स गणको राज्ञः समीपं तं पुत्रं नीतवान् ।

तं पुरोवर्त्तिनं दृष्ट्वा राजोवाच – ''अरे देवधर गणक ! किमधीतम् अनेन पुत्रेण ?''

गणक उवाच – ''देव ! गणकशास्त्रम् अधीतम् अनेन । प्रश्नस्योत्तरं च जानाति । ततोऽद्य देवेन पृष्टो यदि प्रश्नस्योत्तरं विज्ञास्यति तदध्ययनफलं प्राप्स्यति ।''

तदनन्तरं सकौतुको राजा सुवर्णाङ्गुलीयकम् एकं मुष्टौ कृत्वा तमुवाच – ''अये गणककुमार ! जानीहि तावत् किं वस्तु मम मुष्टौ वर्त्तते इति ?''

ततो गणकपुत्रः कठिनीमादाय शास्त्रानुसारेण गणयति स्म । गणनया च विदित्वा अब्रवीत् – ''देव ! न जीवो न मूलं, किन्तु धातुरूपं वस्तु देवस्य मुष्टौ तिष्ठति ।''

राजोवाच - ''त्रुटिशून्यगणना ।''

गणकपुत्रः पुनरुवाच - ''मण्डलाकृति वस्तु वर्त्तते ।''

राजोवाच - ''समुचितं वचनम्''

गणकपुत्रः पुनरवदत्- ''गुरुद्रव्यं, मध्ये शून्यं च भवति ।''

राजोवाच - ''साधु गणककुमार साधु ! भद्रं जानासि, कथय, कथय ।''



https://withteachers.in/

ततः राजप्रशंसया जातरभसः पुलकितबाहुमूलः सः त्वरितं कथयामीति गणनामपहाय स्वतर्केण कथितवान्- ''देव ! पाषाणनिर्मितं छिद्रयुक्तं चक्रमेकं विद्यते देवस्य मुष्टिगर्भे ।''

राजा विहस्य उवाच - ''अये गणक ! तव पुत्रः शास्त्रकृताभ्यासोऽस्ति, किन्तु अबुद्धिः । यावद्दूरं शास्त्रानुसारिण्या गणनया कथितं तावत् समुचितम् एव । अन्यच्च स्वकीयतर्केण यदुक्तं तत्र विसंवादो जातः ।

किमधिकम् ? अरे मूर्ख गणकपुत्र ! त्वं न जानास्येव महत् एतादृशं विशालं पाषाणचक्रं मनुष्यमुष्टिगर्भे न सम्भवति । तत् कथम् असंगतः एवायं तर्कस्तव चेतसि आयातः । तस्मादवश्यं बुद्धिहीनोऽसि ।'' इत्यभिधाय राजा तस्मै किंचिद्वस्तु दत्त्वा तमाज्ञप्तवान्–

गुरुं निषेवन्नपि जीवनाय
भ्रमन् धरित्र्यामपि यावदम्बुधि ।
अधीत्य शास्त्राण्यपि चिन्तयन् मुहु–
र्धिया विहीनो न हि याति धन्यताम् ।।

**(पुरुषपरीक्षा)**

## टिप्पणी

**वर्वरः** – ମୂର୍ଖ, **अधिगच्छति** – ବୁଝେ, ଜାଣେ । **शुकवत्** – ଶୁଆପରି । **शुकवत् अभ्यस्तशास्त्रः**– ଶୁଆ ପରି ଶାସ୍ତ୍ର ଅଭ୍ୟାସ କରିଥିବା ବ୍ୟକ୍ତି । **परिचितगुणम्** – (ପରିଚିତଃ ଗୁଣଃ ଯସ୍ୟ ତମ୍, ବହୁବ୍ରୀହି) ଯେଉଁ ବ୍ୟକ୍ତିର ଗୁଣର ପରିଚୟ ହୋଇଛି । **पुरोवर्त्ती** – ସମ୍ମୁଖରେ ଥିବା । **अधीतम्** – ପଠିତ । **गणकशास्त्रम्** – ଜ୍ୟୋତିଷଶାସ୍ତ୍ର । **देवेन** – ପ୍ରଭୁଙ୍କ ଦ୍ୱାରା । **अङ्गुलीयकम्** – ମୁଦି । **मुष्टिः** – ମୁଠା । **कठिनी** – ଖଡ଼ି । **विदित्वा** – ଜାଣି । **त्रुटिशून्यगणना** – ଠିକ୍ ଗଣନା । **जातरभसः** – ଜାତ ଆନନ୍ଦ ଯାହାର , ଆନନ୍ଦିତ । **पुलकितः** – ରୋମାଞ୍ଚିତ । **अपहाय** – ଛାଡ଼ି, ତ୍ୟାଗକରି । **मुष्टिगर्भे** – ମୁଠା ମଧ୍ୟରେ । **पाषाणनिर्मितं छिद्रयुक्तं चक्रम्** – ପଥରଚକି । **विसंवादः** – ଅସଙ୍ଗତି, ଅସମ୍ବଦ୍ଧତା । **अभिधाय** – କହି । **आज्ञप्तवान्** – ଆଦେଶଦେଲେ । **अम्बुधि** – ସମୁଦ୍ର ।



https://withteachers.in/

## अभ्यास :

1. **निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) देवधरः केन भावेन पुत्रं शुकवत् शिक्षितम् अकरोत् ?

(ख) गणकः कथं राज्ञः समीपं पुत्रं नीतवान् ?

(ग) पुत्रं नयन् गणकः राजानं किम् उवाच ?

(घ) शान्तिधरः राज्ञः प्रथमप्रश्नस्य कीदृशम् उत्तरं दत्तवान् ?

(ङ) शान्तिधरस्य मूर्खता कीदृशी ?

(च) राजा विहस्य किम् उवाच ?

(छ) राजा गणकपुत्राय किञ्चित् वस्तु दत्त्वा किम् आज्ञप्तवान् ?

2. **संक्षेपेण उत्तरं लिखत ।**

(क) देवधरनामा गणकः कुत्र अवसत् ?

(ख) देवधरस्य पुत्रस्य नाम किम् ?

(ग) गणकपुत्रः काम् आदाय शास्त्रानुसारेण अगणयत् ?

(घ) कीदृशं वस्तु राज्ञः हस्ते आसीत् ?

(ङ) राजप्रशंसया पुलकितः गणकपुत्रः कां त्यक्तवान् ?

(च) गणकपुत्रः केन उत्तरं कथितवान् ?

(छ) शान्तिधरस्य स्वतर्कानुसारेण राज्ञः मुष्टौ किम् आसीत् ?

(ज) शान्तिधरस्य कुत्र अभ्यासः अस्ति इति राजा उवाच ?

(झ) मनुष्यमुष्टिगर्भे किं न सम्भवति ?



https://withteachers.in/

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) तं पुरोवर्त्तिनं दृष्ट्वा राजोवाच ।

(व्याप्त्यर्थे द्वितीया, कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया)

(ख) प्रश्नस्य उत्तरं च जानाति । (सम्बन्धे षष्ठी, कृद्योगेषष्ठी, अनादरे षष्ठी)

(ग) किं वस्तु मम मुष्टौ वर्त्तते ।

(अवच्छेदे सप्तमी, स्थानाधिकरणे सप्तमी, कालाधिकरणे सप्तमी ) ।

(घ) मण्डलाकृति वस्तु वर्त्तते । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(ङ) मध्ये शून्यं च भवति । (भावे सप्तमी, स्थानाधिकरणे सप्तमी, विषयाधिकरणे सप्तमी)

(च) स गणको राज्ञः समीपं तं पुत्रं नीतवान् ।

(शेषे षष्ठी, समीपशब्दयोगे षष्ठी, कृद्योगे षष्ठी)

(छ) गणकशास्त्रम् अधीतम् अनेन । (सहार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया, प्रयोजनार्थे तृतीया)

(ज) गणनया च विदित्वा अब्रवीत् । (हेतौ तृतीया, करणे तृतीया, प्रकृत्यादिभ्यः तृतीया)

(झ) राजा तस्मै किंचिद् वस्तु दत्त्वा तमाज्ञप्तवान् ।

(दानार्थे चतुर्थी, निवारणार्थे चतुर्थी, तुमुन् लोपे चतुर्थी)

**4. वाक्यरचनां कुरुत ।**

एव, श्रमेण, अद्य, अये!, चेतसि, कथम्, अवश्यम्, दत्त्वा, अधीत्य, विहीनः ।

**5. सन्धिं कुरुत ।**

पुत्रः + बभूव , तस्य + इच्छया, यत् + एनम् , मनः + रथम् , गणकः + चिन्तितवान् , शास्त्र + अनुसारेण , कथयामि + इति , यावत् + दूरम् , संवादः + एव, तम् + उवाच, कठिनीम् + आदाय, यत् + उक्तम् ।

**6. सन्धिविच्छेदं कुरुत ।**

राजोवाच, नाधिगच्छति, ततोऽद्य, पृष्टो यदि, प्रश्नस्योत्तरम्, अन्यच्च, यदुक्तम् , विसंवादो जातः, पुनरवदत् , तमाज्ञप्तवान् , जानास्येव ।



https://withteachers.in/

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) गणकपुत्रम् (गणकः पुत्रः तम्, गणकस्य पुत्रःतम्, गणकाय पुत्रः तम्) ।

(ख) राज्ञः प्रशंसा तया (राजप्रशंसा, राजप्रशंसया, राजप्रशंसायाः) ।

(ग) पाषाणनिर्मितम् (तृतीया तत्पुरुषः, कर्मधारयः, द्विगुः) ।

(घ) देवधरनामा (देवधरस्य नाम, देवधरःनाम यस्य, देवधरः नाम) ।

(ङ) मुष्टेः गर्भः तस्मिन् (मुष्टिगर्भः, मुष्टिगर्भे, मुष्टिगर्भेण) ।

(च) स्वकीयः तर्कः तेन (बहुव्रीहिः, कर्मधारयः, द्विगुः) ।

(छ) अधिगतशास्त्रम्

(अधिगतं शास्त्रं येन तम्, अधिगतं शास्त्रं यस्य तम्, अधिगतं शास्त्रं यस्मिन्) ।

(ज) अविद्यमाना बुद्धिः यस्य सः (बुद्धिहीनः, अबुद्धिः, नष्टबुद्धिः) ।

(झ) त्रुटिशून्यगणना (बहुव्रीहिः, द्विगुः, कर्मधारयः) ।

(ञ) गुरुद्रव्यम् (गुरु द्रव्यम्, गुरुः एव द्रव्यम्, गुरोः एव द्रव्यम्) ।

(ट) असंगतः (न संगतः, न एव संगतः, नास्ति संगतः) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) अधिगतम् = अधि + ______ + क्त । (गम्, नम्, रम्)

(ख) अधीतम् = अधि + इ + ______ । (क्त, क्तवतु, ल्यप् )

(ग) पृष्टः = ______ + क्त । (पुष् , पृष् , प्रच्छ् )

(घ) आकृतिः = आ + कृ + ______ । (क्तिन् , ल्यप् , शतृ)

(ङ) हीनः = ______ + क्त । (ही, हा, धा )

**9. स्त्रीप्रत्यये रूपाणि लिखत–**

महत्, पुत्र, राजन्, मूर्ख, एतादृश्, मनुष्य, बुद्धिहीन ।

■



https://withteachers.in/

S5GXC7

# बलीयसी केवलमीश्वरेच्छा

*विश्वप्रसिद्धस्य तिरुपतिवेङ्कटेशमन्दिरस्य मुख्यद्वारे प्रतापरुद्रदेवस्य (षोड़शशताब्दी) कन्या जगन्मोहिनी इत्यस्याः प्रतिमूर्त्तिः स्थापिता वर्त्तते । तस्याः सादरानुरोधात् विजयनगरनृपतिः कृष्णदेवरायः भगवतः श्रीवेङ्कटेशस्य मन्दिरं निर्माय सुवर्णाच्छादितं कृतवान् इति अस्ति जनश्रुतिः । एतद्धि भक्तिभावस्य, आन्ध्रोत्कलप्रदेशयोः बन्धुतायाश्च निदर्शनम् । तिरुपतिराष्ट्रियसंस्कृत-विद्यापीठस्य कुलपति-ड. हरेकृष्णशतपथिमहोदयस्य सौजन्यात् प्राप्तेयं कथा संपादिता ।*

उत्कलेषु सूर्यवंशशासनस्य प्रतिष्ठाता आसीत् गजपतिः कपिलेन्द्रदेवः । तस्य पुत्रः पुरुषोत्तमदेवः काञ्चीविजयं कृतवान् । तस्य पुत्रः आसीत् गजपतिः प्रतापरुद्रदेवः । सूर्यवंशप्रशासकाः विशालसैन्यबलैः देशमुत्तरेण गङ्गातः दक्षिणेन गोदावरीं यावत् सुविस्तृतं भूखण्डं विजित्य विरलगौरवस्य अधिकारिणः बभूवुः । तेषां राजकीयोपाधिः एवंभूत आसीत्, यथा ''गजपतिः गौडेश्वर-नवकोटिकर्णाटोत्कलवर्गेश्वरः वीराधिवीरवरः प्रतापी महाराजः'' इति ।

खीष्टीयषोडशशतकस्य प्रारम्भभागे आन्ध्रराज्ये कृष्णदेवरायः नरपतिरासीत् । तस्मिन् समये उत्कलगजपतिः प्रतापरुद्रदेवः आसीत् । तेन सह कृष्णदेवरायस्य युद्धमभवत् । युद्धादनन्तरं गजपतिप्रतापरुद्रदेवेन कृष्णदेवरायस्य सन्धिः सञ्जातः । प्रतापरुद्रस्य कन्या जगन्मोहिनी अतीव सुन्दरी आसीत् । गजपतिः प्रतापरुद्रः कृष्णदेवेन सह स्वकन्यायाः जगन्मोहिन्याः विवाहं सम्पाद्य प्रभूतानि धनानि तस्मै समर्पितवान् । जगन्मोहिन्या समं कृष्णदेवरायः स्वदेशम् अगच्छत् ।

एकदा जगन्मोहिन्या सह वार्त्तालापसमये कृष्णदेवरायः तस्याः कटिप्रदेशे चक्राकारं खड्गम् आलोक्य भयभीतोऽभवत् । वस्तुतः सा तस्याः मेखला आसीत् । उत्कलपरम्परानुसारेण खड्गरूपां मेखलां क्षत्रियराजकुमारी विपत्काले आत्मरक्षार्थं व्यवहरति स्म । रहस्यमिदं कृण्णदेवो न अजानात् । सोऽमन्यत यत् पितृपराजयात् प्रतिशोधपरायणा उत्कलकुमारी कदाचित् तस्य हत्यां करिष्यति इति ।

जगन्मोहिनी तस्मै सत्यं न्यवेदयत् । परन्तु स तस्याः वचने विश्वासं न अकरोत् । ततोऽसौ जगन्मोहिन्याः निर्वासनार्थम् आदिष्टवान् ।



https://withteachers.in/

राज्ञः आदेशानुसारं निर्वासिता जगन्मोहिनी आन्ध्रप्रदेशस्य घनारण्यसङ्कुले सप्तगिरिवेष्टिते चन्द्रगिरिप्रदेशे एकाकिनी न्यवसत् । राजकन्या संस्कृतकाव्यरचनायां संगीतविद्यायां च निपुणा आसीत् । जगन्मोहिनी स्वदुर्भाग्यस्य कारणम् ईश्वरेच्छा इति अवधार्य चित्तप्रशान्तये काव्यं रचयामास । यथा –

भ्रमन् वनान्ते नवमञ्जरीषु
न षट्पदो गन्धफलीमजिघ्रत् ।
नासौ न रम्या न च किं स रन्ता
गरीयसी केवलमीश्वरेच्छा ।।

पद्यमिदं सकरुणं सुललितञ्च वीणावाद्येन सह गायन्ती सा वनवासिभिः विलोकिता । वनवासिनः तस्याः परिचयं ज्ञात्वा तस्यां महतीं श्रद्धां समवेदनाञ्च प्रदर्शयामासुः । तस्याश्चित्तप्रसादनाय वनवासिनस्तां वेङ्कटेश्वरं दर्शयितुं नीतवन्तः । तत्र जगन्मोहिनी माधवस्य रूपं दृष्ट्वा नीलमाधवरूपिणः श्रीजगन्नाथस्य स्मरणं कृत्वा भावविह्वला जाता । ततः आरभ्य भक्त्या प्रतिदिनं सा पर्वतशिखरमागत्य तस्य अर्चनां कृत्वा महान्तं सन्तोषमवाप ।

अथैकदा भूपतिः कृष्णदेवः मृगयानिमित्तं तत्प्रदेशम् आगतः । वनवासिनस्तस्य भव्यं स्वागतं कृतवन्तः । कथाप्रसङ्गेन संगीतनिपुणायाः जगन्मोहिन्याः विषये श्रुत्वा, तस्याः निलयं गत्वा तां द्रष्टुमैच्छत् । तत्रागत्य स्वीयां कनिष्ठां राज्ञीं जगन्मोहिनीं तदवस्थायां दृष्ट्वा सर्वं विदितवान् । तस्याः स्वरचितां संस्कृतकवितां श्रुत्वा च विस्मितः । अकारणं तां प्रति सः अन्यायम् आचरितवान् इति अवगम्य अतीव दुःखितोऽभवत् । पश्चात्तापं गतः सः अपि तां क्षमां सम्प्रार्थितवान् । पूर्णमर्यादया पुनः स्वकीयं राजप्रासादं प्रापयितुं तस्यै न्यवेदयत् । तदुद्यममनादृत्य जगन्मोहिनी तमवादीत् – ''भवान् (कृष्णदेवः) तदा मम पतिरासीत् । सम्प्रति तु भगवान् वेङ्कटेशः माधवः मम पतिरेव । तं जगत्पतिं विहाय नाहं कुत्रापि स्थास्यामि । परस्मिन् दिवसे कृष्णदेवस्य प्रार्थनया सा तं देवस्थानं नीत्वा वेङ्कटेशं प्रादर्शयत् । मुग्धचकितः राजा अपश्यत् यत् सप्तगिरिषु चन्द्रगिरिः अन्यतमः । तत्र माधवरूपः भगवान् वेङ्कटेश्वरः वनवासिभिः पूजितः आसीत् । राजा वेङ्कटेश्वरस्य दर्शनेन कृतकृत्यः अभवत् ।

ततः राजा जगन्मोहिन्यै अकथयत्- यदि भवती मम प्रासादं नागच्छति, तदस्तु । परन्तु तव कृते किमहं करिष्यामीति स्वेच्छया कथयतु । कृष्णप्राणा सा उक्तवती – राजन् ! मम विवाहकाले मत्पिता बहु सुवर्णादिकं दत्तवान् । तत्सर्वं तव राजकोषे स्यात् । भवान् पर्याप्तं सुवर्णं प्रदाय प्रभोः कृते एकं भव्यं मन्दिरं निर्माय तत् काञ्चनेन आच्छादयतु इति । राजा तथास्तु इत्यवोचत् । तदाज्ञया अविलम्बं यत् प्रार्थितं तत्सम्पादितम् । मन्दिरमपि सुवर्णेन मण्डितं



https://withteachers.in/

कृतम् । तदेव मन्दिरं क्रमशः तिरुपतिवेङ्कटेशमन्दिरनाम्ना विश्वप्रसिद्धं जातम् । एतद्विषयस्य स्मृतिरक्षार्थं वेङ्कटेशमन्दिरस्य मुख्यद्वारे उत्कलराजकन्यकायाः जगन्मोहिन्याः प्रतिमूर्तिं राजा कृष्णदेवरायः स्थापितवान् । सा सम्प्रत्यपि सर्वैरवलोक्यते ।

## टिप्पणी :

**बलीयसी** - (ବଲ୍ + ଈୟସୁନ୍ + ଙୀପ୍) ଅଧିକ ବଳଶାଳିନୀ । **विजित्य** - ବିଜୟ ଲାଭ କରି ।

**एवंभूतः** - ଏହିପରି । **सन्धिः** - ଚୁକ୍ତି, ସମ୍ବନ୍ଧ, ବନ୍ଧୁତା । **संजातः** - ହେଲା । **संपाद्य** - ସଂପାଦନ କରାଇ । **प्रभूतानि** - ପ୍ରଚୁର, ଅଧିକ । **मेखला** - କଟିସୂତ୍ର, କଟିଭୂଷଣ, କମରପଟୀ । **कदाचित्** - କୌଣସି ସମୟରେ । **आदिष्टवान्** - ଆଦେଶ ଦେଲେ । **संकुले** - ପରିପୂର୍ଣ୍ଣ । **अवधार्य** - ଅବଧାରଣ କରି, ମନେକରି । **षट्पदः** - ଭ୍ରମର । **गरीयसी** - ଗୁରୁତରା, ଅଧିକ ମହତ୍ତ୍ୱପୂର୍ଣ୍ଣ । **गन्धफली** - ପ୍ରିୟଙ୍ଗୁଲତା । **अजिघ्रत्** - ଶୁଙ୍ଘିଲା । **विलोकिता** - ଦୃଷ୍ଟା । **ज्ञात्वा** - ଜାଣି । **समवेदनाम्** - ସାନ୍ତ୍ୱନା । **प्रदर्शयामासुः** - ପ୍ରଦର୍ଶନକଲେ । **चित्तप्रसादनाय** - ମନୋରଞ୍ଜନପାଇଁ । **दर्शयितुम्** - ଦେଖାଇବାକୁ । **आरभ्य** - ଆରମ୍ଭ କରି । **भक्त्या** - ଭକ୍ତିରେ । **अर्चनाम्** - ପୂଜା । **अवाप** - ପ୍ରାପ୍ତ ହେଲେ । **भूपतिः** - ରାଜା । **स्वकीयम्** - ନିଜ ସମ୍ବନ୍ଧୀୟ । **कनिष्ठा** - ସାନ । **राज्ञी** - ରାଣୀ । **विदितवान्** - ଜାଣିଲେ । **अवगम्य** - ଜାଣି । **पश्चात्तापम्** - ଅନୁତାପ । **प्रापयितुम्** - ପ୍ରାପ୍ତି ନିମନ୍ତେ । **अनादृत्य** - ଅନାଦର କରି । **अवादीत्** - କହିଲେ । **विहाय** - ତ୍ୟାଗ କରି । **कृतकृत्यः** - କୃତାର୍ଥ, ଚରିତାର୍ଥ, ସନ୍ତୁଷ୍ଟ । **प्रासादः** - ଭବନ । **तदस्तु** - ତାହା ହେଉ । **प्रदाय** - ପ୍ରଦାନ କରି । **निर्माय** - ନିର୍ମାଣ କରି । **काञ्चनेन** - ସୁବର୍ଣ୍ଣଦ୍ୱାରା । **आच्छादयतु** - ଆଚ୍ଛାଦନ କରନ୍ତୁ । **रक्षार्थम्** - (ରକ୍ଷାୟୈ ଇଦଂ ରକ୍ଷାର୍ଥମ୍) ରକ୍ଷାନିମିତ୍ତ । **अवलोक्यते** - ଦର୍ଶନ କରାଯାଏ ।

## अभ्यास :

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) प्रतापरुद्रदेवस्य कस्तावत् वंशपरिचयः ?

(ख) जगन्मोहिन्याः कदा केन सह विवाहः अभवत् ?

(ग) कृष्णदेवरायः जगन्मोहिन्याः निर्वासनार्थं कथम् आदिष्टवान् ?

(घ) जगन्मोहिनीं के कुत्र च वेङ्कटेश्वरं दर्शितवन्तः ?

(ङ) कृष्णदेवरायः कथं पश्चात्तापं कृतवान् ?



https://withteachers.in/

(च) पत्या सह राजप्रासादं गन्तुं जगन्मोहिनी कथम् अवारयत् ?

(छ) मन्दिरनिर्माणविषये जगन्मोहिनी राजानं किम् उक्तवती ?

(ज) जगन्मोहिन्याः प्रतिमूर्त्तिः केन कुत्र स्थापिता ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) उत्कलस्य सूर्यवंशशासनस्य कः प्रतिष्ठाता ?

(ख) कः काञ्चीविजयं कृतवान् ?

(ग) कृष्णदेवरायः कस्मिन् राज्ये नरपतिरासीत् ?

(घ) का प्रतापरुद्रदेवस्य कन्या ?

(ङ) जगन्मोहिन्याः कटिप्रदेशे किं दृष्ट्वा कृष्णदेवरायः भीतः अभवत् ?

(च) क्षत्रियराजकुमारी आत्मरक्षार्थं खड्गरूपां कां व्यवहरति स्म ?

(छ) जगन्मोहिनी कुत्र एकाकिनी न्यवसत् ?

(ज) राजकन्या कस्मिन् शास्त्रे निपुणा आसीत् ?

(झ) 'गन्धफली. शब्दस्य कोऽर्थः ?

(ञ) के जगन्मोहिन्यां महतीं श्रद्धां प्रादर्शयन् ?

(ट) जगन्मोहिनी कस्य रूपं दृष्ट्वा भावविह्वला जाता ?

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) उत्कलेषु सूर्यवंशशासनस्य प्रतिष्ठाता आसीत् कपिलेन्द्रदेवः ।

(भावे सप्तमी, स्थानाधिकरणे सप्तमी, अवच्छेदे सप्तमी)

(ख) ते दक्षिणेन गोदावरीं यावत् विशालभूखण्डं जितवन्तः ।

(अनुक्ते कर्मणि द्वितीया, यावत् शब्दयोगे द्वितीया, दक्षिणेन शब्दयोगे द्वितीया)

(ग) तेन सह कृष्णदेवरायस्य युद्धम् अभवत् ।

(प्रकृत्यादिभ्यः तृतीया, अनुक्ते कर्त्तरि तृतीया, सहार्थे तृतीया)



https://withteachers.in/

(घ) जगन्मोहिनी <u>तस्मै</u> सत्यं न्यवेदयत् ।

(क्रोधार्थे चतुर्थी, निवेदनार्थे चतुर्थी, निवृत्त्यर्थे चतुर्थी)

(ङ) जगन्मोहिनी <u>जगन्नाथस्य</u> स्मरणं कृत्वा भावविह्वला जाता ।

(सम्बन्धे षष्ठी, कृद्योगे षष्ठी, अनादरे षष्ठी)

(च) तस्याः <u>निलयं</u> गत्वा तां द्रष्टुम् ऐच्छत् ।

(गत्यर्थकधातुयोगे द्वितीया, कर्मणि द्वितीया, व्याप्त्यर्थे द्वितीया)

(छ) मुग्धचकितः राजा प्रभोः <u>दर्शनेन</u> कृतकृत्यः जातः ।

(हेतौ तृतीया, करणे तृतीया, प्रयोजनार्थे तृतीया)

(ज) मम <u>विवाहकाले</u> पिता बहु सुवर्णादिकं दत्तवान् ।

(स्नेहार्थे सप्तमी, भावे सप्तमी, कालाधिकरणे सप्तमी)

**4. अधोलिखितानि पदानि व्यवहृत्य वाक्यानि रचयत ।**

दक्षिणेन, समम्, आरभ्य, स्वेच्छया, क्रमशः, भक्त्या, विहाय, कृते, संप्रति ।

**5. सन्धिं कुरुत ।**

राजकीय + उपाधिः, भयभीतः + अभवत् , वीर + अधिवीरवरः, नरपतिः + आसीत् युद्धम् + अभवत् , ततः + असौ, जगत् + मोहिन्याः, रहस्यम् + इदम् , घन + अरण्ये, गौड + ईश्वरः, तम् + अवादीत् , नरपतिः + आसीत् , कुत्र + अपि, केवलम् + ईश्वरेच्छा, युद्धात् + अनन्तरम् , ईश्वर + इच्छा ।

**6. सन्धिविच्छेदं कुरुत :**

आदेशानुसारम्, वनाधिवासिना, दृष्टिमाकृष्टवती, समवेदनाञ्च, वेङ्कटेश्वरम्, श्रीजगन्नाथस्य, द्रष्टुमैच्छत्, पश्चात्ताप, न्यवेदयत्, पतिरासीत्, पतिरेव, करिष्यामीति, स्वेच्छया, तदेव, सम्प्रत्यपि, सर्वैरवलोक्यते ।

**7. बन्धनीमध्यात् विग्रहवाक्यं /समस्तपदं/ समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) शुक्लनवमी (शुक्ला नवमी, शुक्लः नवमी, शुक्लं नवमी)

(ख) जगतः पतिः तम् (जगत्पतिः, जगत्पतिम्, जगत्पतये ।

(ग) चतुर्युगम् (बहुव्रीहिः, द्वन्द्वः, द्विगुः) ।

(घ) वनवासिनः (वने वसति इति, वने वसन्ति इति, वनं वसन्ति इति) ।



https://withteachers.in/

(ङ) सङ्गीतस्य विद्या ताम् (संगीतविद्या, संगीतविद्याम्, संगीतविद्यया) ।

(च) मुख्यद्वारे (तत्पुरुषः, द्वन्द्वः, कर्मधारयः) ।

(छ) प्रतिदिनम् (दिने दिने, दिनात् दिनात्, दिनं दिनम्) ।

(ज) महान् चासौ राजा चेति (महाराजा, महाराजः, महाराजम्) ।

(झ) पुरुषोत्तमः (कर्मधारयः, द्विगुः, सप्तमीतत्पुरुषः)

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) शासनम् = शास् + ______ । (अनीय, ल्युट्, शतृ)

(ख) विजित्य = वि + ______ + ल्यप् । (नी, जी, जि)

(ग) समर्पितवान् = सम् + ऋ + णिच् + ______ । (क्त, क्तवतु, शतृ)

(घ) गीत्वा = _______ + क्त्वा । (कै, गै, पा)

(ङ) स्मरणम् = ______ + ल्युट् । (मृङ्, स्मृ, कृ)

(च) जातम् = ______ + क्त । (जन्, मन्, जि)

(छ) आलोक्य = आ + लोक् + ______ । (शतृ, अनीय, ल्यप्)

(ज) विश्वासम् = वि + श्वस् + ______ । (घञ्, क्त, शतृ)

(झ) अवधार्य = अव + ______ + णिच् + ल्यप् । (धृ, धुञ्, धि)

(ञ) भक्तिः = भज् + ______ । (शतृ, क्त, क्तिन्)

(ट) प्रसिद्धम् = प्र + सिध् + ______ । (शानच्, क्त, शतृ)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

सुन्दर, प्रतिष्ठातृ, कुमार, एकाकिन्, निपुण, गरीयस्, जात, वनवासिन्, गायत्, कनिष्ठ, राजन्, कृष्णप्राण ।

■



https://withteachers.in/

# स्वामी विवेकानन्दः

S5QTDU

*आध्यात्मिकज्ञानगुरुः महान् दार्शनिकः समाजसंस्कारकः स्वामी विवेकानन्दः विश्वप्रसिद्धो वर्त्तते । लोकसमुदायस्य सर्वविधकल्याणार्थं स सततं यत्नपरः आसीन् । तस्य जीवनचरितमपि उत्तममानवनिर्माणार्थम् आदर्शस्थानीयं भवेदिति धिया विषयोऽयम् उपस्थापितः ।*

महामानवाः दिव्यपुरुषाः । ते अमरधाम्नः पृथिवीम् अवतरन्ति । मानवजातेःधर्मस्य विश्वसमुदायस्य च कल्याणार्थं स्वल्पावधिजीवनकालेते महत् कार्यं साधयन्ति पुनरमरधाम प्रत्यागच्छन्ति च । ज्योतिःपुरुषः सार्थकनामा स्वामी विवेकानन्दः युगाकाशे उज्ज्वलज्योतिष्करूपेण नितरां विभाति । नैराश्यान्धकाराच्छन्ने नभसि यूनां कृतेऽद्यापि स उत्साहोद्दीपनालोकं विकिरति । कालजयिनीभिः समीचीनवाणीभिः लोकान् उद्बोधयति । संसारसागरे जीवनपोतं वाहयतः जनान् कूलमानेतुं दिशः निर्दिशति । योगजन्मनस्तस्य अमृता वाणी धरापृष्ठम् अद्यावधि चिरस्रोताः गङ्गेव चिरं पवित्रीकरोति ।

''कोलकाता'' इति नगरे कुलीने परिवारे शुभे क्षणे १२, जानुयारी , १८६३ मिते दिवसे अस्य महापुरुषस्य जन्म । रत्नगर्भा ''भुवनेश्वरीदेवी'' स्वभावसरलः ''विश्वनाथदत्तः'' चास्य मातापितरौ । विवेकानन्दस्य बाल्यनाम नरेन्द्रनाथस्तस्य माता स्नेहेन ''विलु'' इति नाम्ना तम् आहूतवती । माता तम् उक्तवती – ''पुत्र ! आजीवनं पवित्रो भव । आत्मसम्मानं रक्ष, अन्यस्य च सम्मानहानिं मा कुरु'' इति ।

मातुरुपदेशं स स्वजीवने आचरितवान् । बाल्यात् सः ज्ञानपिपासुः ईश्वरविश्वासी ईश्वरजिज्ञासुश्चासीत् । ईश्वरानुसन्धाने व्याकुलोऽसौ रामकृष्णपरमहंसं निकषा गत्वा पृष्टवान् –

''श्रीमन् महाशय ! भवान् भगवन्तं दृष्टवानस्ति'' ?

''हम्, दृष्टवानस्मि, यथा त्वां पश्यामि'' इति उत्तरं रामकृष्णेन प्रदत्तम् । अनेन उत्तरेणैव रामकृष्णपरमहंसे तस्य पूर्णविश्वासो जातः । अथ तमेव गुरुरूपेण स्वीकृतवान् । गुरुणा सोऽपि शिष्यरूपेण स्वीकृतः । योग्यगुरोः योग्यशिष्यस्य च संयोगः दैवनिर्दिष्टः । विश्वस्य आध्यात्मिकक्षेत्रे महती परम्परा प्रतिष्ठिता । सत्यमिदम्, अयं शुभमुहूर्तः विश्वकल्याणार्थं चिरादेव प्रतीक्षितः ।

आध्यात्मिकज्ञानवृद्धये स प्राच्यपाश्चात्त्यदर्शनशास्त्राणि अधीतवान् । अतीव मेधाविनस्तस्य स्मृतिः नितरां प्रखरा आसीत् ।



https://withteachers.in/

सकृदेव पठनेन श्रवणेन वा स स्मृतिपटले चिराय सर्वं निधातुं शक्नोति स्म ।

तस्य गभीरस्वरः श्रोतॄणां हृदयानि स्पृशति स्म । ११ , सेप्टेम्बर , १८९३ मिते दिवसे आमेरिकास्थिते चिकागोनगरे विश्वधर्मसम्मेलने अंशग्रहणं कृत्वा स यदा भाषणप्रारम्भे श्रोतॄन् सम्बोधितवान् –''हे मम आमेरिकादेशस्था भ्रातरः भगिन्यश्च'' तदा करतालैः सम्मेलनस्थानं प्रकम्पितमासीत् । ''वसुधैव कुटुम्बकम्'' इति विषयमनुसृत्य भाषणं प्रदाय सकलान् चमत्कृतवान् । न केवलं सनातनधर्मस्य अपि तु मानवधर्मस्य प्रसाराय विभिन्नस्थानेषु समुचितभाषणं दत्त्वा स विश्वविश्रुतो बभूव ।

दरिद्राणां कृते तस्य हृदयं विगलितमासीत् । तेषां साहाय्यार्थं लोकानुद्बोधयति स्म । सन्न्यासी अपि स स्वजनन्याः दुःखानि निवारयितुं सततमचेष्टत । आजीवनं तामपि स्मरति स्म ।

स कथयति –

''यः मातरं यथार्थं पूजयति, सः अवश्यम् उत्तमो मानवो भविष्यति । प्रतिकूलावस्थासु आत्मनः प्रकाशः विकासश्चेति द्वयं नाम सफलं जीवनम् ।'' इति

स यथा वदति, तथा स्वजीवने आचरति ।

कोलकातायाः वेलुरग्रामे गुरोः रामकृष्णस्य नाम्ना मठं संस्थाप्य सनातनधर्मस्य मौलिकतत्त्वस्य प्रचारेण सह स दरिद्राणां सेवामारभत । रामकृष्णमिशन्माध्यमेन उद्बुद्धैः युवकैः सम्प्रति विश्वस्य अनेकत्र सेवा क्रियते ।

०४, जुलाई , १९०२ मिते दिवसे स इहलीलां समाप्य दिव्यधाम गतवान् । प्रायशः ईश्वरस्य पुत्राः न खलु दीर्घजीविनः । ते सुतरां स्वल्पजीवनेन संसारस्य प्रभूतम् उपकारं कुर्वन्ति । योगजन्मा कालजयी स महापुरुषः अद्यापि विश्वं ज्ञानालोकैरुद्भासयति ।

तस्य स्वप्नस्य अमरवाण्याः च सफलः प्रयोगः तं प्रति यथार्थसम्मानः भविष्यति ।

## टिप्पणी :

अमरधाम – ସ୍ୱର୍ଗଧାମ । प्रत्यागच्छन्ति – ଫେରିଯାନ୍ତି । ज्योतिष्कः – ତାରା । विभाति – ଶୋଭା ପାଆନ୍ତି । यूनाम् – ଯୁବକଯୁବତୀମାନଙ୍କର । कृते – ପାଇଁ । विकिरति – ବିଚ୍ଛୁରିତ କରୁଛି । कुलीन – ଉତ୍ତମ ପରିବାର । जिज्ञासुः – ଜାଣିବାକୁ ଇଚ୍ଛୁକ ବ୍ୟକ୍ତି । प्रतीक्षितः – ଅପେକ୍ଷା କରାଯାଇଥିଲା । प्राच्यदेश – ଭାରତ । पाश्चात्यदेश – ଭାରତେତର ଦେଶସମୂହ । निधातुम् – ରଖିବାକୁ । शक्नोति स्म – ସମର୍ଥ ହେଲେ । विश्वविश्रुतः – ବିଶ୍ୱବିଖ୍ୟାତ । विगलित – ତରଳି ଯାଇଥିବା । କଠିନ ନହେବା । सततम् – ସର୍ବଦା । संस्थाप्य – ସ୍ଥାପନ କରି । सनातन – ନିତ୍ୟ, ଶାଶ୍ୱତ । उद्बुद्धः – ପ୍ରଭାବିତ । योगजन्मा – ଶୁଭମୁହୂର୍ତ୍ତରେ ଯାହାଙ୍କ ଜନ୍ମ । ସୌଭାଗ୍ୟବାନ୍ । उद्भासयति – ଆଲୋକିତ କରୁଛି ।



https://withteachers.in/

## अभ्यास :

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) महामानवाः किं कुर्वन्ति ?

(ख) विश्वकल्याणार्थं कीदृशः शुभमुहूर्त्तः प्रतीक्षितः ?

(ग) विवेकानन्दः कथं स्मृतिपटले सर्वं निधातुं शक्नोति स्म ?

(घ) विवेकानन्दः कथं विश्वप्रसिद्धः अभवत् ?

(ङ) रामकृष्णमिशन्माध्यमेन किं भवति ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कौ विवेकानन्दस्य मातापितरौ ?

(ख) भुवनेश्वरीदेवी विवेकानन्दं स्नेहेन किम् आहूतवती ?

(ग) ईश्वरानुसन्धित्सुः विवेकानन्दः कं निकषा गतवान् ?

(घ) कुत्र तस्य पूर्णविश्वासः जातः ?

(ङ) माता विवेकानन्दं किम् उक्तवती ?

(च) केषां कृते तस्य हृदयं विगलितमासीत् ?

(छ) किं नाम सफलं जीवनम् ?

(ज) उत्तममानवः भवितुं विवेकानन्दः कां पूजयितुं कथयति ?

(झ) वेलुरनगरं कुत्र वर्त्तते ?

(ञ) कदा स दिव्यधाम गतवान् ?

**3. बन्धनीमध्यात् रेखाङ्कितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) स रामकृष्णपरमहंसं निकषा गत्वा पृष्टवान् ।

(कर्मणि द्वितीया, निकषा शब्दयोगे द्वितीया, व्याप्त्यर्थे द्वितीया) ।



https://withteachers.in/

(ख) <u>दरिद्राणां</u> कृते तस्य हृदयं विगलितम् आसीत् ।

(कृते शब्दयोगे षष्ठी, सम्बन्धे षष्ठी, कृद्योगे षष्ठी) ।

(ग) <u>पुत्र</u> ! आजीवनं पवित्रो भव । (कर्त्तरि प्रथमा, सम्बोधने प्रथमा, अव्यययोगे प्रथमा)

(घ) उत्तरं <u>रामकृष्णेन</u> प्रदत्तम् । (सहार्थे तृतीया, प्रयोजनार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया)

(ङ) अनेकत्र <u>सेवा</u> क्रियते । (कर्त्तरि प्रथमा, उक्ते कर्मणि प्रथमा, अव्यययोगे प्रथमा)

(च) मौलिकतत्त्वस्य <u>प्रचारेण</u> सह स दरिद्राणां सेवाम् आरभत ।

(अनुक्ते कर्त्तरि तृतीया, सहार्थे तृतीया, प्रयोजनार्थे तृतीया)

**4. वाक्यरचनां कुरुत ।**

इति, नाम्ना, गत्वा, नाम, चिराय, सकृत्, प्रदाय, प्रभूतम् ।

**5. सन्धिं कुरुत ।**

मातुः + उपदेशम्, पवित्रः + भव, दृष्टवान् + अस्मि, उत्तरेण + एव, तम् + एव, सत्यम् + इदम्, वसुधा + एव, अद्य + अपि, उत् + ज्वलम्, सः + अपि, विकासः + च ।

**6. सन्धिविच्छेदं कुरुत ।**

पुनरमरधाम, प्रत्यागच्छन्ति, कूलमानेतुम्, चिरादेव, प्रतीक्षितः, अतीव, सततमचेष्टत, उत्तमो मानवः ।

**7. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) अन्धकाराच्छन्ने (अन्धकारैः आच्छन्नं तस्मिन्, अन्धकाराणाम् आच्छन्नं तस्मिन्, अन्धकारे आच्छन्नं तस्मिन्) ।

(ख) संसारः एव सागरः तस्मिन् (संसारसागरः, संसारसागरे, संसारसागरात्) ।

(ग) रत्नगर्भा (द्वन्द्वः, कर्मधारयः, बहुव्रीहिः) ।



https://withteachers.in/

(घ) कल्याणार्थम् (कल्याणस्य इदम्, कल्याणाय इदम्, कल्याणाय इयम्) ।

(ङ) सार्थकं नाम यस्य सः (सार्थकनाम, सार्थकनामा, सार्थकनाम्नी) ।

(च) स्वभावसरलः (द्विगुः, तृतीयातत्पुरुषः, द्वन्द्वः) ।

(छ) दैवनिर्दिष्टः (दैवेन निर्दिष्टः, दैवस्य निर्दिष्टः, दैवः निर्दिष्टः) ।

(ज) वेलुरनाम ग्रामःतस्मिन् (वेलुरग्रामः, वेलुरग्रामे, वेलुरग्रामम्) ।

(झ) ईश्वरानुसन्धानम् (कर्मधारयः, अव्ययीभावः, षष्ठी तत्पुरुषसमासः) ।

(ञ) दिव्यपुरुषः (दिव्यः पुरुषः, दिव्यस्य पुरुषस्य, दिव्येन पुरुषः) ।

(ट) स्वस्य जननी तस्याः (स्वजननी, स्वजनन्याः, स्वजनन्या) ।

(ठ) आजीवनम् (आजीवनात्, जीवनं यावत्, जीवनस्य पर्यन्तम्) ।

(ड) कालं जयति इति (कालजयः, कालजयी, कालजयम्) ।

(ढ) ईश्वरविश्वासी (बहुव्रीहिः, उपपदतत्पुरुषः, द्विगुः) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) आच्छन्नः = आ + छद् + _____ । (क्त, क्तवतु, शतृ)

(ख) आहूतवती = आ + ह्वे + _____ + ङीप् । (शानच्, क्तवतु, शतृ)

(ग) निधातुम् = नि + _____ + तुमुन् । (हा, धा, हु )

(घ) दत्त्वा = _____ + क्त्वा । (दा, धा, हु)

(ङ) उद्बुद्ध = उद् + बुध् + _____। (अल्, क्त, क्तिन् )

(च) प्रतिष्ठिता = प्रति + _____ + क्त । (टाप्) (स्था, ष्ठा, ष्ठै)

(छ) कृत्वा = कृ + _____ । (ल्यप्, क्त्वा, शतृ)

**9. स्त्रीप्रत्यये रूपाणि लिखत –**

कालजयिन्, सरल, उक्तवत्, भवत्, ईश्वर, श्रीमन्, भगवत्, देव, मानव, युवन् ।

■



https://withteachers.in/

# वैज्ञानिकः डक्टर अबदुल कलामः

S5ZPFH

*आदर्शमानवरूपेण वैज्ञानिकस्य डक्टर कलाममहोदयस्य विशिष्टः परिचयः अस्ति । शिशुप्रियः स श्रमस्योपरि प्राधान्यं ददाति । बाल्यात् अद्यापि तस्य जीवनचर्या आदर्शस्थानीया । जीवने स्वप्नदर्शनस्य महत्त्वम् अस्ति । देशस्य अभिवृद्धिनिमित्तं स्वप्नः अभिनन्दनीयः । स स्वप्नः कथं सफलः स्यात् तदर्थं कलामस्य जीवनव्यापिनी साधना अनुसरणीया ।*

पुत्रो धन्यः यो जातः सन् ज्ञानगौरवेण जन्मभूमेः उन्नत्यर्थमात्मानं समर्पयति । सः देशस्य एकः योग्यः पुत्रः अस्ति । स विज्ञानक्षेत्रे निरन्तरं गवेषयति, क्षेपणास्त्रजगति भारतं प्रथयति । स सुतरां प्रथितयशाः अन्ताराष्ट्रियख्यातिसम्पन्नः क्षेपणास्त्रमानवो वैज्ञानिकः पूर्वतनराष्ट्रपतिः डक्टर एपीजे (APJ) अबदुल कलामः ।

प्राज्ञपुरुषस्य कलामस्य जन्म ख्रीष्टीये १५, अक्टोबर, १९३१ मिते दिवसे प्राचीनमद्रास- राज्यान्तर्गते रामेश्वरमिति नगरे अभवत् । तस्य पिता '' जइनुलावद्दिनः'' विवेकवान् उदारः अतिथिपरायणः, माता ''आशिआम्मा'' सुगृहिणी स्नेहमयी च । तस्य त्रयो भ्रातरः एकैव भगिनी ।

पित्रोः सुगुणैः प्रभावितः कलामः बाल्यादेव मातुः ''आशिआम्मा'' तः रामायण -महाभारत-कोरानादिग्रन्थानां कथाःअशृणोत्, याः कथाः उत्तममानवनिर्माणाय अलं भवन्ति । स्वभावेन नम्रः सः गुणवद्भिर्बालैः सहपाठिभिश्च सार्धं बन्धुत्वं कुर्वन् सुगुणान् गृह्णाति स्म ।

एकदा बाल्यसमये पित्रा सह मन्दिरप्राङ्गणे उपविष्टः कलामो मनोरमाभिः गगनसागरयोः दृश्यराजिभिः भावाविष्टोऽभवत् । उड्डयमानां विहगपङ्क्तिं पश्यतस्तस्य मुखात् स्वत एव– ''नभसि पक्षिसदृशोऽहं नूनमेव उड्डयिष्ये'' इति वाक्यं निरगच्छत्। यत् परवर्तिनि काले कृच्छ्रसाधनैः फलितम् ।

स विद्याध्ययने अत्यन्तमनोनिवेशात् सर्वेषां गुरूणां प्रीतिभाजनं जातः सज्ज्ञानं च प्राप्तवान् ।



https://withteachers.in/

सर्वेभ्यो गुरुभ्योऽपि सातिशयं सम्मानं प्रदर्शयति । सुव्यवहारेण सर्वेषां शुभाशंसां लभमानः स सफलतायाः शिखरप्रदेशम् आरूढवान् ।

विज्ञानविषयं प्रति प्रगाढ़ानुरागः यन्त्रविद्यापठनाय तं प्रैरयत् । मद्रास-वैषयिकप्रतिष्ठाने (Madras Institute of Technology) अध्येतुं स योग्यः विवेचितः अभवत् । परन्तु अध्ययनार्थं तत्र प्रेषणाय आवश्यकोऽर्थराशिः पितुःपार्श्वे नासीत् । दैन्यबलात् मनोबलं दृढतरम् । यन्त्रविद्यायाः अध्ययनाय तस्य प्रबलमाग्रहम् आलोक्य भगिनी ''जोहरा'' स्वस्य स्वर्णकङ्कणं हारं च बन्धकरूपेण निधाय आवश्यकमर्थराशिं दत्तवती । कार्येऽस्मिन् भगिनीपतेरपि अकुण्ठं समर्थनमासीत् । एतत् पश्यन् कलामः– ''अध्ययनादनन्तरं स्वोपार्जितेनाऽर्थेन बन्धकं निश्चयं मोक्षयिष्यामीति'' शपथं नीतवानासीत् । अतः भगिनी ''जोहरा'' भगिनीपतिः ''अहम्मद-जलालुद्दिनश्चेति'' द्वयं साक्षाद् देवतेति तेन स्वीकृतम् । उपकारिणो जनास्ते सन्तु गुरवोऽथवा सन्तु बन्धुपरिजनाः सन्तु इतरे वा ते सर्वे सदा तेनाऽविस्मरणीयाः वर्तन्ते ।

अथ मद्रास– वैषयिकप्रतिष्ठानात् व्योमयानविषयकयन्त्रविद्यायां कृतित्वेन सह स उत्तीर्णः । गवेषणाकार्ये निरन्तरमनोनिवेशात् स विवाहमुपेक्षितवान् । प्राप्तेऽवसरे तु गीता कोरान् चेति धर्मग्रन्थद्वयं स पठति अथवा रुद्रवीणां वादयति ।

क्षेपणास्त्रनिर्माणे तस्य भूयो भूयः प्रचेष्टया भारतमद्य शक्तिशालिराष्ट्ररूपेण विश्वे परिचीयते । एस्.एल्-भि ३ यानस्य सफलपरीक्षणमालक्ष्य प्रधानमन्त्री स्वर्गता इन्दिरागान्धीमहोदया अभिनन्दनवार्त्तां संप्रेष्य कलामं द्रष्टुमैच्छत् । एतद् विषयमधिकृत्य ''इस्रो'' (ISRO) अध्यक्षः प्रोफेसर डक्टर सतीशधावनः कलामं निकषा पत्रं प्रेषितवान् । ''उच्चमानयुतं परिच्छदं विना कथं प्रधानमन्त्रिणं द्रष्टुं यास्यामीति'' चिन्तापरः स आत्मनः समस्यां दूरभाष(दूरवाणी) माध्यमेन व्यज्ञापयत् ।

प्रोफेसर धावनमहोदयेन कथितम् : ''कलाम ! गुणैरेव नरो रम्यः साफल्यं न परिच्छदैः । त्वं स्वक्रियया साफल्यं प्राप्तवान् । तस्मात् भव्यैः परिच्छदैः किं प्रयोजनम् ? चिराचरितवेशेन त्वम् इन्दिरागान्धीमहोदयां द्रष्टुमर्हसि ।''



https://withteachers.in/

तस्य नेतृत्वेन निर्मितानि पृथिवी, त्रिशूलम्, आकाशः, नागश्चेति क्षेपणास्त्राणि भारतस्य सुरक्षाव्यवस्थां द्रढ़यन्ति । कतिपयपाश्चात्त्यराष्ट्राणां विरोधेऽपि बहुप्रतीक्षितस्य अग्निनामकस्य क्षेपणास्त्रस्य सफलं परीक्षणं संजातम् । कार्येऽस्मिन् प्रायः पञ्चशताधिका वैज्ञानिकाः यन्त्रिणश्च कार्यरता आसन् । फलेन विश्वे हि प्रतिरक्षाक्षेत्रे भारतस्य गौरवं वर्द्धतेतराम् । क्षेपणास्त्रविशारदः कलामः क्षेपणास्त्रमानवरूपेण प्रतिष्ठितः ।

साधनाक्षेत्रे उत्सृष्टजीवनचर्यया कार्यकुशलतया च बहुसम्मानैः सम्मानितः स सप्तनवत्यधिकोनविंशशततमे (१९९७) वर्षे ''भारतरत्नम्'' इत्युपाधिना भूषितः ।

२५, जुलाई, २००२ मिते दिनाङ्के भारतस्य द्वादशराष्ट्रपतिरूपेण सोऽधिष्ठितः । प्रथमाभिभाषणे देशस्य सामूहिकसमृद्धये स खाद्यशस्यानां विद्युच्छक्तेश्चोत्पादनार्थम्, चिकित्सायाः शिक्षाव्यवस्थायाश्च आशुप्रसाराय, सूचनाप्रयुक्तिविद्याया उपयोगनिमित्तम्, प्रतिरक्षा-परमाणु-महाकाशप्रयुक्तिविद्यादीनां द्रुतविकासार्थं प्राधान्यमदात् ।

स बालेषु नितरां स्निह्यति । बाला एव भाविनागरिकाः । तेषां कृते स सदा आशावाणीं श्रावयति, अग्रे सर्त्तुं च प्रेरयति, यत्र यत्र याति तत्र बालैः सह मिलति, उपविशति, हसति, आलपति, विभिन्नान् प्रश्नान् पृष्ट्वा समुचितशिक्षां ददाति । ''उच्चलक्ष्यप्राप्तये स्वप्नं पश्य, समयानुवर्त्ती भव, ज्ञानप्राप्तये कठिनं श्रमं कुरु, श्रमेणैव सफलता लभ्यते, श्रमेण कस्याऽपि प्राणाः न यान्ति, सुतराम् आलस्यं प्राणनाशस्य कारणं स्यादित्युपदेशवाणीं'' स बालेभ्यः प्रददाति ।

कलामे बहुसुगुणाः सन्ति, न लेशोऽपि दुर्गुणस्य दुरभ्यासस्य च । जातिधर्मसम्प्रदायानाम् ऊर्द्ध्वे स वर्त्तते । विज्ञानस्य ईश्वरविश्वासस्य च समन्वयः तस्मिन् दृश्यते । आजीवनं ब्रह्मचारी शाकाहारी कलामः राष्ट्रसेवानिमित्तं स्वजीवनं समर्पयन् अस्माकम् आदर्शमहापुरुषः भवति ।



https://withteachers.in/

## टिप्पणी :

**प्रथयति** - ପ୍ରସିଦ୍ଧ କରାଉଛନ୍ତି । **प्रथितयशाः** - ଯାହାର ଯଶ ବିସ୍ତାରିତ । **प्राज्ञपुरुषः** - ଜ୍ଞାନୀ ପୁରୁଷ, ମନୀଷୀ । **दृश्यराजिभिः** - ଦୃଶ୍ୟସମୂହ ଦ୍ୱାରା । **उड्डयमानाम्** - ଉଡୁଥିବା । **विहङ्गपङ्क्ति-** ପକ୍ଷିଶ୍ରେଣୀ । **नभसि** - ଆକାଶରେ । **नूनम्** - ନିଶ୍ଚିତ । **कृच्छ्रसाधनैः** - କଷ୍ଟସାଧନା ଦ୍ୱାରା । **शुभाशंसाम्** - ମଙ୍ଗଳକାମନାକୁ । **लभमानः** - ପ୍ରାପ୍ତ ହୋଇଥିବା । **शिखरप्रदेशम्** - ଶୀର୍ଷସ୍ଥାନ । **आरूढ़वान्** - ଆରୋହଣ କଲେ । **प्रगाढ़ः** - ଅତିଶୟ, ଦୃଢ଼ । **प्रैरयत्** - ପ୍ରେରଣା ଦେଲା / ପ୍ରେରିତ କଲା । **अध्येतुम्** - ପଢ଼ିବା ପାଇଁ । **आलोक्य** - ଦେଖି । **निधाय** - ରଖି । **मोक्षयिष्यामि** - ମୁକ୍ତ କରିବି, ମୁକୁଳାଇବି । **भगिनीपतिः** - ଭିଣୋଇ । **उपेक्षितवान्** - ଉପେକ୍ଷା କଲେ । **परिचीयते** - ପରିଚିତ ହେଉଛି । **आलक्ष्य** - ଲକ୍ଷ୍ୟକରି । **संप्रेष्य** - ପଠାଇ । **ऐच्छत्** - ଇଚ୍ଛାକଲେ । **व्यज्ञापयत्** - ଜଣାଇ ଦେଲେ । **भव्यैः** - ଉତ୍ତମ, ସର୍ବୋତ୍କୃଷ୍ଟ । **द्रढ़यन्ति** - ଦୃଢ଼ କରୁଅଛି । **आशु** - ଶୀଘ୍ର । **श्रावयति** - ଶୁଣାନ୍ତି । **सर्त्तुम्** - ଚାଲିବାକୁ, ଯିବାକୁ । **प्रेरयति** - ପ୍ରେରଣା ଦେଉଛନ୍ତି । (ଜଇନୁଲାବଦ୍ଦିନ - ଡ. କଲାମଙ୍କ ପିତାଙ୍କ ନାମ । ଆଶିଆମ୍ମା - ଡ. କଲାମଙ୍କ ମାତାଙ୍କ ନାମ । ଜୋହରା - ଡ. କଲାମଙ୍କ ଭଉଣୀଙ୍କ ନାମ । ଅହମ୍ମଦ ଜଲାଲୁଦ୍ଦିନ - ଭିଣୋଇ (ଜୋହରାଙ୍କ ସ୍ୱାମୀ) ।

## अभ्यास :

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) कलामस्य बाल्यसमयः कीदृग्भावेन अतिवाहितः ?

(ख) कलामः भगिन्याः बन्धकं नूनं मोचयिष्यामि इति शपथं कथं नीतवान् ?

(ग) प्रोफेसर-धावन्महोदयः कलामं किं कथितवान् ?

(घ) द्वादशराष्ट्रपतिभावेन कलामः केषामुपरि प्राधान्यम् अददात् ?

(ङ) बालानां कृते कलामः काम् उपादेयशिक्षां ददाति ?

(च) डक्टर कलामः कथम् आदर्शपुरुषः ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कलामस्य पिता कीदृशः आसीत् ?

(ख) कलामः मातुः काः अशृणोत् ?

(ग) कलामः कथं भावाविष्टः अभवत् ?



https://withteachers.in/

(घ) कलामेन किं द्वयं देवतेति स्वीकृतम् ?

(ङ) इन्दिरागान्धी कथं कलामं द्रष्टुम् ऐच्छत् ?

(च) कलामः केषाम् ऊर्द्ध्वे वर्त्तते ?

(छ) कलामे कयोः समन्वयः दृश्यते ?

(ज) कलामस्य पितुर्नाम किम् ?

(झ) काः उत्तममानवनिर्माणाय अलं भवन्ति ?

(ञ) कलामः केषां प्रीतिभाजनम् अभवत् ?

(ट) सफलतायाः शिखरप्रदेशं स कथम् आरूढ़वान् ?

(ठ) का यन्त्रविद्यां पठितुं कलामं प्रैरयत् ?

(ड) कस्मिन् विषये भगिनीपतेः समर्थनम् आसीत् ?

(ढ) धावन्महोदयः कस्य अध्यक्षः आसीत् ?

(ण) प्राप्तेऽवसरे कलामः किं वादयति ?

(त) नरः कथं रम्यः भवति ?

(थ) ड. कलामः कदा भारतरत्नम् इति उपाधिं लब्धवान् ?

(द) ड. कलामः केषु स्निह्यति ?

(ध) आलस्यं कस्य कारणं स्यात् ?

(न) कलामे के सन्ति ?

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) <u>पित्रा</u> सह मन्दिरप्राङ्गणे उपविष्टः ।

(अनुक्ते कर्त्तरि तृतीया, सहार्थे तृतीया, अङ्गविकारे तृतीया)

(ख) स आत्मनः समस्यां दूर<u>भाषमाध्यमेन</u> व्यज्ञापयत् ।

(करणे तृतीया, हेतौ तृतीया, प्रकृत्यादिभ्यः तृतीया)



https://withteachers.in/

(ग) स <u>बालेषु</u> नितरां स्निह्यति ।

(स्नेहार्थे सप्तमी, अधिकरणे सप्तमी, भावे सप्तमी)

(घ) ड. सतीशधावन् <u>कलामं</u> निकषा पत्रं प्रेषितवान् ।

(कर्मणि द्वितीया, निकषा शब्दयोगे द्वितीया, क्रियाविशेषणे द्वितीया)

(ङ) तेषां कृते स सदा <u>आशावाणीं</u> श्रावयति ।

(कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया, व्याप्त्यर्थे द्वितीया)

(च) <u>परिच्छदैः</u> किं प्रयोजनम् । (प्रयोजनार्थे तृतीया, सहार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया)

**4. वाक्यरचनां कुरुत ।**

उपरि, अपि, अलम्, सार्द्धम्, प्रति, विना, कारणम्, स्निह्यति, श्रमेण, सातिशयम् ।

**5. सन्धिं कुरुत ।**

स्वतः + एव, रामेश्वरम् + इति, अधि + एतुम्, उत् + डयमानाम् , प्राप्ते + अवसरे, सत् + ज्ञानम् , गुणैः + एव, श्रमेण + एव, नूनम् + एव, सहपाठिभिः + च, भगिनीपतेः + अपि, मनः + बलम्, द्रष्टुम् + अर्हसि ।

**6. सन्धिविच्छेदं कुरुत ।**

बाल्यादेव, निरगच्छत्, त्रयो भ्रातरः, एकैव, आवश्यकोऽर्थराशिः, नासीत्,

कार्येऽस्मिन्, भगिनीपतेरपि, मनोनिवेशात्, समर्थनमासीत् ।

**7. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) सातिशयम् (अतिशयेन सह वर्त्तमानम्, अतिशयस्य वर्त्तमानम्, अतिशये वर्त्तमानम्) ।

(ख) ज्ञानस्य प्राप्तिः तस्यै (ज्ञानप्राप्तिं, ज्ञानप्राप्तये, ज्ञानप्राप्तेः) ।

(ग) प्रथितं यशः यस्य सः (कर्मधारयः, द्विगुः, बहुव्रीहिः) ।

(घ) शिखरस्य प्रदेशः तम् (शिखरप्रदेशः, शिखरप्रदेशेन, शिखरप्रदेशम्) ।

(ङ) समयानुवर्त्ती (द्विगुः, द्वन्द्वः, उपपदतत्पुरुषः) ।



https://withteachers.in/

(च) भगिनीपतिः (भगिन्या पतिः, भगिन्याः पतिः, भगिनीं पतिः) ।

(छ) आशायाःवाणी ताम् (आशावाणी, आशावाणीम्, आशावाण्याः) ।

(ज) विद्युच्छक्तेः (षष्ठीतत्पुपुरुषः, द्विगुः, कर्मधारयः) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) उपविष्टः = उप + विश् + _______ । (क्त, तव्य, शतृ)

(ख) पठितुम् = _______ + तुमुन् । (पठ्, गम्, नी)

(ग) निधाय = नि + धा + _______ । (शतृ, ल्यप्, क्त)

(घ) पश्यन् = _______ + शतृ । (दु, दृश्, मृश्)

(ङ) प्राप्तवान् = प्र + आप् + _______ । (क्त, क्तवतु, शतृ)

(च) कुर्वन् = कृ + ______ । (शतृ, शानच्, क्त)

(छ) लभमानः = लभ् + ______ । (क्तवतु, घञ् , शानच् )

(ज) आरूढवान् = आ + ______ + क्तवतु । (रुह् , रुड्, रुद् )

(झ) संप्रेष्य = सम् + प्र + इष् + ______ । (ल्यप्, ल्युट्, क्त्वा)

(ञ) रतम् = _____ + क्त । (रुद्, रा, रम्)

(ट) विकासः = वि + कस् + _____ । (घञ्, क्त, शतृ)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

सुगृहिन्, सहपाठिन्, पति, बन्धु, उत्तीर्ण्ण, स्वर्गत, नर, ब्रह्मचारिन्, पश्यत् ।

■



https://withteachers.in/

S69KH5

# भौतिकं पर्यावरणम्

''परि'' ''आवरण'' इति अनयो:योगेन ''पर्यावरण'' शब्द: निष्पन्न: भवति । पृथिवी एक: विचित्र: ग्रह: यत्र विभिन्नरूपेण जीवजगत: विकास: अभवत् । पृथिवीं परित: यत् नैसर्गिकम् आवरणम् अस्ति, तत् पर्यावरणम् उच्यते । सम्प्रति परिवेष इति शब्द: पर्यावरणस्य पर्यायवाचक: । ''वेष्टने परिवेष: स्याद् भानो: सविधमण्डले'' । अमरकोषे ''परिवेष'' इति शब्द: उपलब्ध: । परिवेषस्तु परिधि: उपसूर्यकमण्डले । परित: विष्यते अनेन इति परिवेष: । परि + विष् (व्याप्तौ) + घञ् = परिवेष: । येन सर्वं व्याप्तं भवति स परिवेष: । जगत् परित: आवरणं पर्यावरणम् । सृष्टिप्रक्रियायां पञ्च महाभूतानि परस्परं संश्लिष्टानि । सूक्ष्मात् भूतात् स्थूलस्य भूतस्य उत्पत्ति: भवति । आकाशाद् वायु:, वायो: अग्नि:, अग्ने: आप:, अद्भ्य: पृथिवी । एवं भौतिकसृष्टिक्रम: । पृथिवी स्थूलतमा यत्र अन्यानि भूतानि संश्लिष्टानि सन्ति । पर्यावरणे एतानि भूतानि गृहीतानि । आकाश:, वायु:, अग्नि:, जलम्, पृथिवी च भूतानि । पर्यावरणमध्ये एतेषां ग्रहणं भवति । Ecology, Oecology इति शब्दद्वयं Oiko(s) इति ग्रीक् शब्दत: निष्पन्नम् । यस्यार्थ: गृहम् । संस्कृते ''ओकस्'' शब्द: गृहपर्यायवाचक: । प्राणिजगत: उद्भिज्जगत: च व्यापकं गृहं भवति पर्यावरणम् ।

भौतिक-जैविकभेदेन पर्यावरणं द्विविधम् । भौतिकपर्यावरणे पञ्चभूतानां, जैविके वृक्षाणां जीवानां च ग्रहणं भवति । प्राणिन: भूमे: भोजनं, जलाज्जलं, वायुमण्डलात् प्राणवायुं च गृहीत्वा जीवन्ति । भौतिकपर्यावरणस्य सुरक्षया जीवजगत् सुरक्षितं भविष्यति ।

**पृथिवी** – ''पृथिवी-विश्वम्भरा वसुधानी प्रतिष्ठा जगतो निवेशनी'' (अथर्ववेद:-XII,16) पृथिवी अस्माकं माता । पृथिवी जीवजगत्, वृक्षजगत्, रत्नानि, खनिजद्रव्याणि च धारयति । पृथिव्या: संरक्षणेन सर्वे सुरक्षिता: भविष्यन्ति । भूमे: प्रदूषणेन रोगा: जायन्ते । वृक्षाणां वृथा छेदनेन अत्यधिकरासायनिक-



https://withteachers.in/

कीटनाशकविषप्रयोगेण च भूमिः प्रदूषिता शक्तिहीना च भवति । भूमिः प्रकृतिः उच्यते । अतः तस्याः संरक्षणेन सर्वं संरक्षितं भवति ।

**जलम् –** जायते अस्मात् इति 'जम्', लीयते अस्मिन् इति 'लम्' । यत्र जीवजगतः उत्पत्तिः लयः च भवतः तद्भवति जलम् । एवम् अर्थस्य जलं प्रतीकं भवति । जलं सर्वत्र आप्नोति व्याप्तं भवति, अतः जलम् आपः इति उच्यते । पृथिव्यां यज्जलं व्याप्तं भवति, सूर्यरश्मिभिः वाष्पीभवनप्रक्रियया तज्जलं मेघे सञ्चितं भवति । वर्षाकाले वृष्ट्या तज्जलम् अन्नम् उद्भावयति । ''अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः'' इति गीतावचनम् । जले जीवनस्य बीजं सृष्टम् । ''अप एव ससर्जादौ तासु बीजमवासृजत् ।'' (मनुस्मृतिः I.8) । जलं 'रस' उच्यते । पर्वतेभ्यः प्रवहन्तीषु जलधारासु मृत्तिकाधातुखनिजलवणादिरसाः सञ्चरन्ति । अत्र जीवनस्य धारकं वर्धकं च तत्त्वं निहितमस्ति, शिल्पायनेन वर्ज्यवस्तुत्यागेन जलं प्रदूषितं रोगजनकं च भवति । निर्मलेन जलेन जीवनम् आयुरारोग्यमयं भवति ।

**अग्निः –** अग्निः तेजोरूपः । अग्नेः दाहिका शक्तिः सर्वमशुद्धं वस्तु नाशयति, पर्यावरणस्य विशुद्धिं च रक्षति । सूर्यः, यज्ञाग्निः गार्हपत्याग्निः वनाग्निः वडवाग्निः इति विविधरूपेण अग्निः शुद्धेः कारणं भवति, वायुमण्डलस्य विषप्रक्रियाम् अग्निः नाशयति, संसारस्य हितं साधयति च ।

**वायुः –** ''वाति गच्छति गन्धं वहति'' इति वायुः । जीवनस्य आधारः वायुः । वायुः विश्वभेषजरूपः । प्राणवायुद्वारा जीवनस्य सञ्चारः भवति । यज्ञे अग्नौ घृतयुक्ताः आहुतयः वायुमण्डलं शुद्धं कुर्वन्ति । वृक्षः वायुमण्डलात् अङ्गाराम्लं गृहीत्वा अङ्गारं सञ्चिनोति, प्राणवायुम् अम्लजानं निःसारयति । वृक्षः स्वपत्रमाध्यमेन रश्मिप्रतिपालनप्रक्रियया (Photosynthesis) खाद्यं प्रस्तौति । वायुसंशोधने वृक्षाणां भूमिका महत्त्वपूर्णा । वृक्षाणां छेदनेन वायुप्रदूषणं वर्धते । वायुमण्डलस्य सुरक्षया जीवनं सुरक्षितं स्यात् ।

**आकाशः –** ''आ समन्तात् कशते प्रकाशते'' इति आकाशः । वायुमण्डलस्य शुद्धिनिमित्तं द्युलोकस्य भूलोकस्य च संरक्षणम् आवश्यकम् । आकाशः पिता पृथिवी माता । द्यौर्नः पिता (अथर्ववेदः - VI, 120, 2) द्युलोकस्य अन्तरिक्षस्य वा प्रदूषणेन ऊर्जास्रोतसः हानिः, भूमेः प्रदूषणेन जीवनं च संकटापन्नं भवति ।



https://withteachers.in/

एतानि भूतानि समन्वितरूपेण प्राणिनां जीवनं धारयन्ति पोषयन्ति च । एकस्यापि विपर्यये सृष्टेः विनाशः अवश्यम्भावी । विश्वस्य तदावरणस्य पर्यावरणस्य च सुरक्षया सृष्टिरियं नूनं रमणीया भविष्यति । सर्वत्र शान्तिः विराजताम् इति धिया एतेषां सुरक्षानिमित्तं शान्तिमन्त्रः पठ्यते ।

ओँ द्यौः शान्तिः, अन्तरिक्षं शान्तिः, पृथिवी शान्तिः, आपः शान्तिः, ओषधयः शान्तिः, वनस्पतयः शान्तिः, विश्वेदेवाः शान्तिः, ब्रह्म शान्तिः, सर्वं शान्तिः, शान्तिरेव शान्तिः, सा मा शान्तिरेधि । ओँ शान्तिः शान्तिः शान्तिः । (यजुर्वेदः- 36-17)

## टिप्पणी :

परिवेषः – ସୂର୍ଯ୍ୟ ଚାରିପାଖରେ ଥିବା ଧୂଳିକଣିକାମଣ୍ଡଳକୁ ପରିବେଷ କୁହାଯାଏ । पर्यावरणम् – ପୃଥିବୀ ଚାରିପାଖରେ ଥିବା ଆବରଣକୁ ପର୍ଯ୍ୟାବରଣ କୁହାଯାଏ । अद्भ्यः – ଜଳରୁ । पर्जन्यात् + अन्नसम्भवः । पर्जन्यात् – ବୃଷ୍ଟିରୁ । आपः – ଜଳ । द्विविधम् – ଦୁଇପ୍ରକାର । लीयते – ଲୀନ ହୁଏ । प्रवहन्तीषु – ବହୁଥିବା। ओकस् – (କ୍ଲୀବଲିଙ୍ଗ) ଉଚ୍ + ଅସୁନ୍ = ଗୃହ / ଆବାସ । विश्व – ଭୂମଣ୍ଡଳ । तदावरणम् - ତାହାର ଆବରଣ (ବାୟୁମଣ୍ଡଳ) । पर्यावरणम्- ବୃହତ୍ତର ଆବରଣ ।

## अभ्यास :

1. **निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) किं तावत् पर्यावरणम् ?

(ख) कस्तावत् परिवेषः ?

(ग) पर्यावरणमध्ये केषां ग्रहणं भवति ?

(घ) कथं पृथिव्याः सरंक्षणं कर्त्तव्यम् ?

(ङ) निर्मलेन जलेन किं भवति ?

(च) अग्निः कथं संसारस्य हितं साधयति ?



https://withteachers.in/

(छ) वायुमण्डलस्य सुरक्षा कथं करणीया ?

(ज) कथं सृष्टिः रमणीया भविष्यति ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) पर्यावरणशब्दः कथं निष्पन्नः भवति ?

(ख) कथं पृथिवी एकः विचित्रः ग्रहः ?

(ग) कः पर्यावरणस्य पर्यायवाचकः ?

(घ) कानि पञ्चमहाभूतानि ?

(ङ) पर्यावरणं कतिविधम् ?

(च) भौतिकपर्यावरणे केषां ग्रहणं भवति ?

(छ) का अस्माकं माता ?

(ज) कस्याः प्रदूषणेन रोगाः जायन्ते ?

(झ) कया प्रक्रियया जलं मेघे सञ्चितं भवति ?

(ञ) जलं कम् उद्भावयति ?

(ट) कः तेजोरूपः ?

(ठ) कः जीवनस्य आधारः ?

(ड) वृक्षः किं गृहीत्वा किं निःसारयति ?

(ढ) कः अस्माकं पिता ?

(ण) कया धिया शान्तिमन्त्रः पठ्यते ?



https://withteachers.in/

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) <u>जीवजगतः</u> विकासः अभवत् । (कृद्योगे षष्ठी, हेतुवाचकशब्दात् षष्ठी, शेषे षष्ठी)

(ख) <u>जगत्</u> परितः आवरणं पर्यावरणम् ।

(अनुक्ते कर्मणि द्वितीया, परितः शब्दयोगे द्वितीया, क्रियाविशेषणे द्वितीया) ।

(ग) पर्यावरणे एतानि <u>भूतानि</u> गृहीतानि ।

(उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(घ) <u>पृथिवी</u> अस्माकं माता । (कर्त्तरि प्रथमा, उक्ते कर्मणि प्रथमा, अव्यययोगे प्रथमा)

(ङ) वर्षाकाले <u>वृष्ट्या</u> तज्जलम् अन्नम् उद्भावयति ।

(प्रकृत्यादिभ्यः तृतीया, हेतौ तृतीया, करणे तृतीया)

(च) वायुमण्डलस्य <u>विषप्रक्रियाम्</u> अग्निः नाशयति ।

(कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया, व्याप्त्यर्थे द्वितीया)

(छ) प्राणवायुद्वारा <u>जीवनस्य</u> सञ्चारः भवति । (कृद्योगे षष्ठी, अनादरे षष्ठी, सम्बन्धे षष्ठी)

(ज) वृक्षाणां <u>छेदनेन</u> वायुप्रदूषणं वर्धते । (हेतौ तृतीया, करणे तृतीया, प्रयोजनार्थे तृतीया)

**4. अधोलिखितपदानि व्यवहृत्य वाक्यानि रचयत ।**

परितः, जायते, रक्षति, धिया, भूतानि, साधयति ।

**5. सन्धिं कुरुत ।**

परिवेषः + तु, यस्य + अर्थः, तत् + भवति, यत् + जलम्, निहितम् + अस्ति, अति + अधिकम्, सर्वम् + अशुद्धम्, वडवा + अग्निः, एकस्य+अपि, सृष्टिः + इयम् ।



https://withteachers.in/

**6. सन्धिविच्छेदं कुरुत ।**

पर्यावरणम्, जलाज्जलम्, तज्जलम्, एकस्यापि, रस उच्यते, आयुरारोग्यमयम्, अङ्गाराम्लम्, द्यौर्नः, शान्तिरेधि ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं /समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) सृष्टिक्रमः (कर्मधारयः, बहुव्रीहिः, षष्ठीतत्पुरुषः) ।

(ख) प्राणिनाम् जगत् तस्य (प्राणिजगतः, प्राणिजगति, प्राणीजगतः) ।

(ग) वायोःमण्डलम् (सप्तमीतत्पुरुषः, कर्मधारयः, षष्ठीतत्पुरुषः) ।

(घ) प्राणनामा वायुः तम् (प्राणवायुः, प्राणवायुम्, प्राणनामवायुम्) ।

(ङ) शक्तिहीना (शक्त्या हीना, शक्तौ हीना, शक्तेः हीना) ।

(च) सूर्यरश्मिभिः (पञ्चमीतत्पुरुषः, षष्ठीतत्पुरुषः, बहुव्रीहिः) ।

(छ) वर्षाकाले (वर्षाणां कालः तस्मिन्, वर्षायाःकालः तस्मिन्, वर्षासु कालः तस्मिन्) ।

(ज) जलधारासु (कर्मधारयः, षष्ठीतत्पुरुषः, पञ्चमीतत्पुरुषः) ।

(झ) अशुद्धम् (नञ्तत्पुरुषः, निषेधार्थकः बहुव्रीहिः, द्विगुः) ।

(ञ) वनजातः अग्निः (वनजाग्निः, वनाग्निः, वनजाताग्निः) ।

(ट) महाभूतानि (महान् भूतानि, महत् भूतानि,महान्ति भूतानि) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) पर्यावरणम् = परि + आ + ______ + ल्युट् । (वर् , ब्रू , वृ)

(ख) निष्पन्नः = निस् + पद् + ________ । (क्त, क्तिन् , शानच्)

(ग) विकासः = वि + ______ + घञ् । (काश् , कष् , कस्)



https://withteachers.in/

(घ) परिवेषः = परि + विष् + _______ । (अच्, तव्य, घञ्)

(ङ) सृष्टिः = सृज् + _______ । (क्त, शतृ, क्तिन्)

(च) संश्लिष्टानि = सम् + _______ + क्त । (श्लिष्, शिष्, श्रिञ्)

(छ) उत्पत्तिः = उत् + ______ + क्तिन् । (पद्, पत्, पठ्)

(ज) ग्रहणम् = ग्रह् + ________ । (शतृ, अनीय, ल्युट्)

(झ) संस्कृतिः = सम् + _______ + क्तिन् । (कृ, स्कु, क्री)

(ञ) भोजनम् = भुज् + ______ । (ल्युट्, शतृ, शानच्)

(ट) गृहीत्वा = _______+ क्त्वा । (गृह्, ग्रह्, गृजि)

(ठ) सुरक्षितम् = सु + रक्ष् + _______ । (क्तिन्, तुमुन्, क्त)

(ड) छेदनम् = ______ + ल्युट् । ( छेद्, छिद्, छिद्र )

(ढ) प्रदूषिता = प्र + _______ + क्त (टाप्) । (दूष्, दुष्, दोष्)

(ण) शक्तिः = ______ + क्तिन् । (शच्, शकि, शक्)

(त) हीना = हा + _______ + टाप् । (अन, ल्युट्, क्त)

(थ) प्रकृतिः = प्र + कृ + _______ । (क्त, क्तिन्, शतृ )

(द) संरक्षणम् = सम् + रक्ष् + ______ । (क्त, क्त्वा, ल्युट् )

(ध) सञ्चितम् = सम् + _______ + क्त । (चो, चि, चिञ् )

(न) अन्नम् = _______ + क्त । (अन्, अद्, वच् )



https://withteachers.in/

(प) सृष्टम् = सृज् + ________ । (तुमुन्, क्त, क्तवतु)

(फ) प्रवहन्ती = प्र + वह् + ________ (ङीप्) । (क्त, शतृ, क्तिन्)

(ब) निहितम् = नि + ______ + क्त । (हि, हु, धा)

(भ) त्यागः = ______ + घञ् । (तेज, त्यज्, तेपृ)

(म) रोगः = रुज् + ______ । (अच्, अन, घञ्)

(य) आधारः = आ + धृ + _______ । (अच्, घञ्, शतृ)

(र) हानिः = _______ + क्तिन् । (धा, हि, हा)

(ल) विनाशः = वि + _______ + घञ् । (नश्, नद्, नक्क्)

(व) रमणीया = रम् + _______ (टाप्) । (अन, अनीय, शानच्)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

अग्नि, स्थूलतम, प्राणिन्, धारक, विश्वम्भर, प्रदूषित, प्रवहत्, दाहक ।

■



https://withteachers.in/

# एकाङ्किकाभाग:

# शिशुवात्सल्यम्

*कविकुलललाटमुकुटमणि: कालिदास: समग्रविश्वे महाकविरूपेण सर्वैरद्यापि स्वीक्रियते । महाकवे: कालिदासस्य अनन्यप्रतिभया रचितेषु काव्येषु ''अभिज्ञानशाकुन्तलम्'' नाटकं रम्यत्वात् सर्वजनादृतं भवति । अस्य नाटकस्य सप्तमाङ्कस्थितं दृश्यमेकं भवति रूपकमिदम् । महाकवि: रूपकेऽस्मिन् शिशो: हठस्य माधुर्यं तथा अप्रत्याशितरूपेण पित्रा सह पुत्रस्य मिलनं वर्णयित्वा हृदि वात्सल्यं जनयितुं चेष्टमान: सार्थकोऽभूत् ।*

(तत: प्रविशति तपस्विनीभ्यां सह बाल:)

बाल: – जृम्भस्व सिंह ! दन्तान् ते गणयिष्यामि ।

प्रथमा – अविनीत ! किं नोऽपत्यनिर्विशेषाणि सत्त्वानि पीड़यसि ? हन्त ! वर्द्धते ते संरम्भ: । स्थाने खलु ऋषिजनेन 'सर्वदमन' इति कृतं ते नामधेयम् ।

द्वितीया – एषा खलु केशरिणी त्वां लङ्घयिष्यति यदि एतस्या: पुत्रकं न मुञ्चसि ?

बाल: – (सस्मितम्) अहो ! बलीय: खलु भीतोऽस्मि । (इत्यधरं दर्शयति)

प्रथमा – वत्स ! एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीड़नकं दास्यामि ।

बाल: – कुत्र, देहि तत् । (इति हस्तं प्रसारयति)

द्वितीया – सुव्रते ! न शक्य एष वाङ्मात्रेण विरमयितुम् । गच्छ त्वम् । मदीये उटजे वर्णचित्रितो मृत्तिकामयूर- स्तिष्ठति, तम् अस्य उपहर ।

प्रथमा – तथा । (इति निष्क्रान्ता)

बाल: – अनेनैव तावत् क्रीड़िष्यामि ।

(इति तापसीं विलोक्य हसति)



https://withteachers.in/

राजा – स्पृहयामि खलु दुर्ललिताय अस्मै ।

तापसी – भवतु ! न मामयं गणयति । (पार्श्वमवलोकयति) कोऽत्र ऋषिकुमाराणाम् ? (राजानमवलोक्य) भद्रमुख ! एहि तावत् मोचय अनेन दुर्मोचहस्तग्रहेण शिशुना वाध्यमानं बालमृगेन्द्रम् ।

राजा – (उपगम्य सस्मितम्) अयि भो महर्षिपुत्र ! किमित्येवम् आश्रममर्य्यादाविरुद्धम् आचरसि ?

तापसी – भद्रमुख ! न खल्वयं ऋषिकुमारः ।

राजा – (बालमुपलालयन्) नचेन्मुनिकुमारः अयम् । अथ कोऽस्य गोत्रपरिचयः ?

तापसी – पुरुवंशः ।

राजा – (आत्मगतम्) कथम् एकान्वयो मम ? (प्रकाशम्) न पुनःआत्मगत्या मानुषाणामिदं स्थानं प्राप्तव्यम् ।

तापसी – यथा भद्रमुखो भणति । अप्सरःसंबन्धेन एतस्य जननी अत्र देवगुरोस्तपोवने प्रसूता ।

राजा – अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ?

तापसी– कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्त्तयितुं चिन्तयिष्यति ?

राजा – (स्वगतम्) इयं कथा मामेव लक्षीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छेयम् । अथवा अनार्य्यः परदारव्यवहारः ।

तापसी – (प्रविश्य मृण्मयूरहस्ता) सर्वदमन ! शकुन्तलावण्यं प्रेक्षस्व ।

बालः – (सदृष्टिक्षेपम्) कुत्र वा मे अम्बा ?

उभे– नामसादृश्येन वञ्चितो मातृवत्सलः ?

द्वितीया – वत्स ! अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि ।

राजा – (आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या ? अथवा सन्ति पुनर्नामधेयसादृश्यानि ।

बालः – आर्य्यके, रोचते मह्यमेष भद्रमयूरः । (इति क्रीड़नकमादत्ते)

प्रथमा – (विलोक्य सोद्वेगम्) अहो ! रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते ।

राजा – अलमावेगेन ! ननु इदमस्य सिंह-शावकविमर्दात् परिभ्रष्टम् ।

(इति रक्षाकरण्डकं ग्रहीतुमिच्छति)



https://withteachers.in/

उभे – मा खलु ! मा खलु ! कथं गृहीतमनेन !

(इति विस्मयात् उरोनिहितहस्ते परस्परमवलोकयत:)

राजा – किमर्थं प्रतिषिद्धा: स्म: ।

प्रथमा – शृणोतु महाराज: । एषा अपराजिता नामौषधि:अस्य जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरौ आत्मानं च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति ।

राजा – अथ गृह्णाति ?

प्रथमा – ततस्तं सर्पो भूत्वा दशति ।

राजा – भवतीभ्यां कदाचिदस्या: प्रत्यक्षीकृता विक्रिया ?

उभे – अनेकश: ।

राजा – (सहर्षम् आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि ? (इति बालं परिष्वजते)

द्वितीया – सुव्रते ! एहि, इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयाव: । (इति निष्क्रान्ते)

बाल:– मुञ्च माम्, अम्बाया: सकाशं गमिष्यामि ।

राजा – पुत्रक ! मया सहैव मातरम् अभिनन्दिष्यसि ।

(अभिज्ञानशाकुन्तलम्)

## टिप्पणी :

**हठस्य** - ଶିଶୁର ଅଝଟପଣିଆ, **जृम्भस्व** - ହାଇମାର (जृम्भणं कुरु / ମୁଖଖୋଲ), **अविनीत** - ଅମାନିଆ, **अपत्यनिर्विशेषाणि** - ଛୁଆଙ୍କୁ ସମାନରୂପେ ଦେଖି, **संरम्भ:** - ଔଦ୍ଧତ୍ୟ, **नामधेयम्** - ନାମକରଣ, **केशरिणी** - ସିଂହୀ, **लङ्घयिष्यति** - ଆକ୍ରମଣ କରିବ, **पुत्रकम्** - ପୁଅକୁ, **सस्मितम्** - ମୁରୁକି ହସି, **बाल- मेृगन्द्रम्** - ଶିଶୁସିଂହକୁ, **वाङ्मात्रेण** - କଥାରେ, **विरमयितुम्** - ନିବୃତ୍ତ କରାଇବାକୁ, **उटजे** - କୁଟୀରରେ, **मृत्तिकामयूर:** - ମାଟିମୟୂର, **उपहर** - ଉପହାର ଦିଅ, **अनेन** - ଏହା ସହିତ (ସହାର୍ଥେ ତୃତୀୟା) **विलोक्य**- ଦେଖି, **दुर्मोचहस्तग्रहेण** - ହାତରୁ ଛାଡୁ ନଥିବା/ଜବରଦସ୍ତ ହାତରେ ଧରି ରଖିଥିବା, **उपलालयन्** - ସ୍ନେହରେ ସ୍ପର୍ଶକରି, ଆଉଁଶି, **आत्मगतम्** - ସ୍ୱଗତ(ମନେମନେ),



https://withteachers.in/

**धर्मदारपरित्यागिनः** - ଧର୍ମପତ୍ନୀ ପରିତ୍ୟାଗ କରିଥିବା ବ୍ୟକ୍ତିର, **संकीर्त्तयितुम्** - ଉଚ୍ଚାରଣ କରିବାକୁ , **अनार्यःपरदारव्यवहारः** - ପରସ୍ତ୍ରୀ ବିଷୟରେ ଆଲୋଚନା ଆର୍ଯ୍ୟୋଚିତ ନୁହେଁ, **शकुन्त**- ପକ୍ଷୀ, **शकुन्तलावण्यम्** - ପକ୍ଷୀ(ମୟୂର)ର ସୌନ୍ଦର୍ଯ୍ୟକୁ, **मातुराख्या** - ମାତାଙ୍କ ନାମ, **रक्षाकरण्डक** - ରକ୍ଷାତାବିଜ/ଡଉଁରିଆ (ଔଷଧଯୁକ୍ତଃ ପୁଟକବିଶେଷଃ), **दशति** - ଦଂଶନ କରେ, **प्रत्यक्षीकृता**- ଦେଖାଯାଇଛି, **विक्रिया** - ବିସ୍ମୟଜନକ କ୍ରିୟା / ପରିଣାମ, **न अभिनन्दामि** - ଅଭିନନ୍ଦନ କରିପାରୁନାହିଁ, **परिष्वजते** - ଆଲିଙ୍ଗନ କରନ୍ତି, **नियमव्यापृतायै** - ବ୍ରତନିୟମ ପାଳୁଥିବା, **अम्बायाः** - ମାତାଙ୍କର, **सकाशम्** - ନିକଟକୁ ।

## अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) प्रथमा तापसी सर्वदमनस्य नामकरणविषये किं कथितवती ?

(ख) द्वितीया तापसी बालाय मृत्तिकामयूरं दातुं कथम् ऐच्छत् ?

(ग) ''अनेनैव तावत् क्रीडिष्यामि'' इति कः कथम् अवदत् ?

(घ) कदा तापसी राजानं साहाय्यं प्रार्थितवती ?

(ङ) तापसी शिशोः परिचयं केन रूपेण अददात् ?

(च) कथं तापसी बालस्य पितुर्नाम वक्तुं नैच्छत् ?

(छ) कुत्र वा मे अम्बा इति बालः कथम् उक्तवान् ?

(ज) रक्षाकरण्डकस्य को विशेष आसीत् ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) बालः सिंहशिशुं धृत्वा किम् अवदत् ?

(ख) बालस्य नाम किमासीत् ?

(ग) सर्वदमनः इति बालस्य नाम केन कृतम् ?

(घ) का मृत्तिकामयूरम् आनीतवती ?

(ङ) मृत्तिकामयूरः कुत्र आसीत् ?



https://withteachers.in/

(च) तापसी राजानं दृष्ट्वा किं कर्त्तुम् अवदत् ?

(छ) सर्वदमनः कस्मिन् वंशे जातोऽभवत् ?

(ज) परदारव्यवहारः कीदृशः भवति ?

(झ) कथं तापस्यौ विस्मिते अभवताम् ?

(ञ) रक्षाकरण्डकं केन कदा सर्वदमनाय दत्तम् ?

(ट) रक्षाकरण्डके का ओषधिः आसीत् ?

(ठ) बालस्य मातुर्नाम किम् ?

(ड) नामसादृश्येन कः वञ्चितः आसीत् ?

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) कृतं <u>ते</u> नामधेयम् । (कृद्योगे षष्ठी, सम्बन्धे षष्ठी, अतसर्थप्रत्यययोगे षष्ठी)

(ख) <u>अनेन</u> एव तावत् क्रीडिष्यामि । (करणे तृतीया, अङ्गविकारे तृतीया, हेतौ तृतीया)

(ग) स्पृहयामि खलु <u>दुर्ललिताय</u> अस्मै । (दानार्थे चतुर्थी, स्पृह्धातुयोगे चतुर्थी, निवृत्त्यर्थे चतुर्थी)

(घ) <u>मानुषाणाम्</u> इदं स्थानं प्राप्तव्यम् ।

(कृत्यप्रत्ययान्तपदयोगे षष्ठी, सम्बन्धे षष्ठी, तुल्यार्थे षष्ठी)

(ङ) कुत्र वा <u>मे</u> अम्बा । (कृद्योगे षष्ठी, स्मरणार्थे षष्ठी, सम्बधे षष्ठी)

(च) रोचते <u>मह्यम्</u> एषः भद्रमयूरः ।

(रुच्यर्थक धातु प्रयोगे-चतुर्थी, सम्प्रदाने चतुर्थी, तुमुन् लोपे चतुर्थी)

(छ) अलम् <u>आवेगेन</u> । (वारणार्थे तृतीया, हेतौ तृतीया, अनुक्ते कर्त्तरि तृतीया)

(ज) <u>शकुन्तलायै</u> निवेदयावः । (दानार्थे चतुर्थी, निवेदनार्थे चतुर्थी, दयार्थे चतुर्थी)

(झ) <u>अम्बायाः</u> सकाशं गमिष्यामि ।(निकटार्थकशब्दयोगे षष्ठी, कृद्योगे षष्ठी, सम्बन्धे षष्ठी)



https://withteachers.in/

**4. वाक्यरचनां कुरुत:**

कुत्र, सकाशम्, गणयति, अयि !, रोचते, इदम्, किमर्थम्, एहि, सहर्षम् ।

**5. सन्धिं कुरुत ।**

यदि + एतस्या:, अनेन + एव, माम् + अयम्, क: + अत्र, पुन: + आत्मगत्या, देवगुरो: + तपोवने, इदम् + अस्य, तत: + तम्, कदाचित् + अस्या: ।

**6. सन्धिविच्छेदं कुरुत ।**

भीतोऽस्मि, इत्यधरम्, वाङ्मात्रेण, मोचयानेन, खल्वयम् , कोऽस्य, मानुषाणामिदम्, कस्तस्य, मामेव, मातुराख्या, मह्यमेष:, अलमावेगेन, सहैव, नाभिनन्दामि ।

**7. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) अविनीत: (नास्ति विनीत:, न विनीत:, न विनय: यस्य) ।

(ख) सर्वदमन: (सर्वं दाम्यति इति, सर्वं दमयते इति, सर्वस्य दमन:) ।

(ग) सहर्षम् (सहार्थे बहुव्रीहि:, कर्मधारय:, अव्ययीभाव:) ।

(घ) राजर्षे: (राजा चासौ ऋषिश्चेति तस्य, राजा एव ऋषि:, राजा च ऋषिश्च) ।

(ङ) वाङ्मात्रेण (अव्ययीभाव:, नित्यसमास:, कर्मधारय:) ।

(च) शकुन्तलावण्यम् (षष्ठीतत्पुरुष:, द्विगु:, कर्मधारय:) ।

(छ) ऋषे: कुमार: तम् (ऋषिकुमार:, ऋषिकुमारेण, ऋषिकुमारम्) ।

(ज) न आर्य: (अनार्यम्, अनार्य:, नार्यम्) ।

(झ) तपोवने (तपस: वनं तस्मिन्, तपसे वनं तस्मिन्, तप: एव वनं तस्मिन्) ।

(ञ) भूमौ पतिता ताम् (भूमिपतिता, भूमिपतितया, भूमिपतिताम्) ।

(ट) मनोरथम् (कर्मधारय:, द्विगु:, द्वन्द्व:) ।



https://withteachers.in/

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) भीत: = भी + ——— । (क्त, शतृ, क्तवतु)

(ख) विलोक्य = वि + ——— + ल्यप् । (लोच्, लोक्, लोप्)

(ग) स्थानम् = स्था + ——— । (क्त, ल्युट्, अनीय)

(घ) प्राप्तव्यम् = प्र + आप् + ——— । (क्त, क्तवतु, तव्य)

(ङ) प्रसूता = प्र + ——— + क्त + टाप् । (सृज् , सू , सृ)

(च) परिभ्रष्टम् = परि + ——— + क्त । (भ्रन्श् , भ्रज् , भ्रंस् )

(छ) गृहीतम् = ——— + क्त । (ग्रह् , गृज् , गृ)

(ज) प्रतिषिद्धा: = प्रति + ——— + क्त । (साध् , सिध् , शी)

(झ) दत्ता = दा + ——— + टाप् । (क्तवतु, शतृ, क्त)

(ञ) भूत्वा = भू + ——— । (क्तवतु, क्त, क्त्वा)

(ट) सम्पूर्णम् = सम् + पूर् + ——— । (ल्युट्, क्त, शतृ)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

बाल, सिंह, प्रथम, केशरिन्, मयूर, तापस, तपस्विन्, राजन्, भवन्, महराज ।

■



https://withteachers.in/

# देहि पदपल्लवमुदारम्

S6SCKF

*कविमुकुटहीरको भक्तकविः जयदेवः उत्कलेषु प्राचीतीरे केन्दुविल्वग्रामे जन्म लेभे ।श्रीक्षेत्रे निवसता अनेन द्वादशख्रीष्टाब्दे श्रीकृष्णभक्तिरसामृतं श्रीगीतगोविन्दं काव्यं विरचितम् ।श्रीराधा-माधवयोः दिव्यलीला एव द्वादशसर्गात्मकस्यास्य महाकाव्यस्य प्रतिपाद्यः विषयः । श्लोकैः सह अष्टपदप्रबन्धगीतस्य सफलप्रयोगः कविना कृतः । तत्र राग-तालादीनां निर्देशोऽस्ति । कान्तकोमलमधुरपदानाम् अनुप्रासाद्यलंकाराणाम्, शृङ्गारादिरसानां च संयोजनेन काव्यमिदं विश्वे अतुलनीयम् । लक्ष्मी-स्वरूपिण्याः श्रीराधायाः, गोपकिशोरीणां च माधवं प्रति भक्तिगर्भितं शृङ्गारनिवेदनमेव काव्यस्यास्य निर्यासः । तदवलम्ब्य इयमेकाङ्किका-''देहि पदपल्लवमुदारम्'' इति ।*

**(प्रथमदृश्यम्)**

(जयदेवस्य कुटीरम्, लेखनीहस्तः उपविष्टः जयदेवः गीतगोविन्दपदानि लिखन् आस्ते, द्वारदेशे आह्वयति बन्धुः पराशरः ।)

पराशरः - बन्धो ! जयदेव ! जयदेव !

जयदेवः - (उत्थाय) अरे मित्र ! पराशर ! स्वागतं स्वागतम्, अभिवादये, सर्वं कुशलम् ?

पराशरः - (जयदेवमालिङ्ग्य) जय जगन्नाथ ! अहो भाग्यम् अहो भाग्यम्, तव दर्शनेन प्रमुदितोऽस्मि ।

जयदेवः - (सस्मितम्) एहि मित्र, आगच्छ, अत्रासने उपविश ।(उभौ उपविशतः) ।

पराशरः - गीतगोविन्दस्य रचना प्रचलति वा ?

जयदेवः - एवम् ।

पराशरः - मित्र ! धन्यस्त्वम्, नीलाचलमौलिमण्डनस्य श्रीजगन्नाथस्य भक्तिरसनिष्णातः त्वत्सदृशः अपरः नास्ति ।धन्यः तव पिता भोजदेवः, धन्या जननी रामादेवी ।

जयदेवः - एवं मा कथय, प्रभुभक्तिं न जाने, केवलं जगज्जनन्याः श्रीराधायाः, परमपितुः श्रीजगन्नाथस्य लीलावर्णनार्थं लेखनीं चालयामि ।



https://withteachers.in/

पराशरः - सुहृद्वर ! श्रीराधा-कृष्णयोः दिव्यलीला या श्रीगीतगोविन्दे वर्णिता, तस्याः कुत्रापि तुलना अस्ति वा ? आः कीदृशं कान्तकोमलं ललितं ललितं मधुरं मधुरं पदसंयोजनम् ! अभिनवं रसालं प्रबन्धसङ्गीतम् ! हृदयं निरन्तरं गातुम् अभिलषति । स्मरामि वसन्तरागेण तत् वसन्तवर्णनम् – (गायति)

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे ।

मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ।।

विहरति हरिरिह सरसवसन्ते

नृत्यति युवतिजनेन समं सखि ! विरहिजनस्य दुरन्ते ।।

जयदेवः - पद्मावति ! पद्मावति ! अत्रागच्छ, पश्य, मम पुरतः को विद्यते ।

पद्मावती - (प्रविश्य) मित्र पराशर ! भवान् ? नमस्करोमि (नमस्करोति) ।

पराशरः - जय जगन्नाथ ! नमो नमः, बन्धुपत्नि ! यत्र जयदेवः, तत्र पराशरः ।

जयदेवः - प्रिये ! मित्रस्य कृते श्रीजगन्नाथमहाप्रभोः स्वल्पमपि प्रसादमानय ।

पद्मावती - आम् आर्य (प्रस्थिता) ।

पराशरः - मित्र ! गीतगोविन्दस्य अमृतास्वादनेन हृदयं नितरां तृप्यति । अस्य प्रबन्धसङ्गीतं कर्णेषु मधुधारां वर्षति । कृपया चन्दनचर्चितपद्यं गायतु । अहमपि गायामि ।

(उभौ गायतः) चन्दनचर्चितनीलकलेवरपीतवसनवनमाली ।

केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ।

हरिरिह मुग्धवधूनिकरे, विलसति विलासिनि ! केलिपरे ।।

पद्मावती - (प्रसादमानीय जलपात्रेण समं समर्पयति) नयतु मित्र !

पराशरः - (स्वीकरोति) बन्धो ! त्वमपि नय, (ददाति, उभौ खादतः) ।

पद्मावती - मित्र ! जयदेवः कविश्रेष्ठः पराशरश्च गायकोत्तमः ।

पराशरः - (हसित्वा) पद्मावती च नृत्यनिपुणा । (सर्वे हसन्ति) ।

(उत्थाय) साधयामः संप्रति । जय जगन्नाथ !

जयदेवः - (उत्थाय) आगच्छ मित्र ! पुनर्दर्शनाय, प्रणमामि । (पराशरः गच्छति)



https://withteachers.in/

## (द्वितीयदृश्यम्)

**(चिन्तितः जयदेवः आसनम् अध्यास्ते)**

पद्मावती - (प्रविश्य - तमालोक्य - स्वगतम्) कथं कान्तः चिन्तायुक्तः आलोक्यते ? (प्रकाशम्) आर्य ! कथमद्य मुखचन्द्रः म्लानः, चिन्तान्वितं च नयनयुगलम् ? किमस्य कारणम् ?

जयदेवः - सत्यं लक्षितं भवत्या । विषमस्थितौ पतितोऽस्मि, गीतगोविन्दस्य सांप्रतिकप्रसङ्गं विचारयतु भवती । किशोरी श्रीराधा कुञ्जवने नागरराजं प्रतीक्षते । निर्दयः श्यामः नायाति । अपरा काऽपि सखी वनमालिना रमिता; इति ज्ञात्वा खिन्ना विरहविधुरा किशोरी दृढम् अभिमानवती । तस्याः मानभञ्जनं कथं भवेत् ?

पद्मावती - हे कविवर ! भवान् सर्वम् उपायं जानाति । रसिकशेखरः मुरलीधरः तस्याः मानभञ्जनार्थं प्रयत्नं करोतु ।

जयदेवः - अयि सखि ! तेन बहुयत्नः कृतः । रासरसिकस्य विनयवचनं शृणु – (गायति)

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी हरति दरतिमिरमतिघोरम् ।
स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयतु लोचनचकोरम् ।।
प्रिये ! चारुशीले ! मुञ्च मयि मानमनिदानम् , देहि मुखकमलमधुपानम् ।।

पद्मावती - अतिरतिरुचिरः अनुनयप्रकारः । परन्तु इदं न यथेष्टम् ।

जयदेवः - प्रिये ! अपरं यदस्ति तस्य रचना एव मम चिन्ताकारणम्, मानभञ्जनार्थं श्रीमन्नारायणं किशोरीचरणतले कथं पातयिष्यामि ?

पद्मावती - (स्मितहास्यपूर्वकम्) श्रीजगन्नाथं शरणं याहि । स एवास्य समाधानं विधास्यति ।

जयदेवः - (उत्थाय) प्रिये ! तैलमानय, स्नानाय सागरं यामि, ततः चिन्तयिष्यामि । (तालपत्रं लेखनीं च गृहस्य चाले स्थापयति) । हे नटनागर ! हे कृष्ण मार्गं दर्शय प्रभो ! (निष्क्रान्तः) ।

पद्मावती - (प्रार्थयति) हे रासरसिक ! श्रीराधावल्लभ ! त्वमेव शरणम् (प्रणमति) ।



https://withteachers.in/

श्रीकृष्ण: - (जयदेववेशं धारयित्वा प्रविशति) पद्मावति ! पद्मावति !

पद्मावती - (उत्थाय) आश्चर्यम् ! स्नानं विना भवान् प्रत्यागत: ?

श्रीकृष्ण: - अयि ! समाधानं संजातम् । श्रीराधाया: मानभञ्जनार्थम् उपयुक्तं पद्यं मया कल्पितम् । तदेव प्रथमं लिखित्वा स्नातुं यास्यामि । (चालात् तालपत्रं, लेखनीं च आनीय, पदानि लिखित्वा तत्र स्थापयति । पद्मायां गृहाभ्यन्तरं गतायां स्वीयं मुरली-मयूरचन्द्रिकायुतं रूपं प्रदर्श्य, स्मितं कृत्वा बहिर्गच्छति)

जयदेव: - (स्नात: प्रविशति) प्रिये पद्मावति !

पद्मावती - (प्रविश्य) आश्चर्यम् ! इदानीम् एव गतवान् । सागरे स्नानं समाप्य प्रत्यागतो वा ?

जयदेव: - किं कथयसि ? अहं तु बहुसमयात् प्राक् गतवान् आसम्, न इदानीमेव ।

पद्मावती - नहि नहि स्वामिन् ! बहुसमयात् प्राक् गत इति सत्यम्, परन्तु पुनरागत्य कल्पितं मानभञ्जनपद्यं पत्रे लिखित्वा इदानीमेव गत: ।

जयदेव: - सखि ! विश्वसिहि, नाहम् आगतवान्, न वा किमपि पद्यं लिखितवान् ।

पद्मावती - (विहस्य) भवद्वेशं धारयन् कोऽपि आगत: किम् ?

जयदेव: - प्रिये ! पत्रं मे दर्शय । (पद्मा तालपत्रमानीय दर्शयति, जयदेव: पठति)

''हरगरलखण्डनं मम शिरसि मण्डनम्

देहि पदपल्लवमुदारम्'' ।

(भक्तिगद्गदस्वरेण) अद्भुतं घटितम् । लीलापुरुषोत्तम: श्रीकृष्ण: मम वेशेन प्रविश्य मानभञ्जनस्य सफलं पद्यं रचयित्वा गत: । एतदेव मम चिन्ताकारणम् आसीत् । कथं वा श्रीजगन्नाथ: श्रीराधाया: चरणग्रहणं कृत्वा मानभञ्जनं करिष्यति ? कदाचित् अस्य वर्णनेन मर्यादालंघनं स्यात् इति । परन्तु स्वयं प्रभु: मम संशयनिरसनं कृतवान्, अहो-भाग्यम् !



https://withteachers.in/

पद्मावती - स्वामिन् ! परमकारुणिकोऽसौ भक्तस्य भावं जानाति, असाध्यसाधनं करोति ।

जयदेवः - पद्मावति ! त्वमेव धन्या । प्रभोः साक्षाद्दर्शनं प्राप्तवती । अयि सौभाग्यवति ! एहि, भक्तमानरक्षकस्य श्रीकृष्णस्य चरणतले प्रणत्यर्घ्यं निवेदयिष्यामः । (उभौ प्रणमतः)

(नेपथ्यगानम्) – इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधिवचनजातम् ।
जयति पद्मावतीरमणजयदेवकविभारतीभणितमिति गीतम् ।।

**- समाप्तम् -**

## अभ्यासः

**1. मातृभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) जयदेवस्य कः परिचयः ?

(ख) कः पराशरः ? स कदा जयदेवनिकटम् आगतः ?

(ग) जयदेवः कस्य प्रीतये किं रचयति ?

(घ) गीतगोविन्दस्य किं किं महत्त्वं पराशरेण वर्णितम् ?

(ङ) कीदृशे वसन्ते हरिः विहरति ?

(च) का पद्मावती ? पराशरस्य कृते सा किम् आनयति ?

(छ) कीदृशो हरिः मुग्धवधूनिकरे विलसति ?

(ज) जयदेवं चिन्तितं वीक्ष्य पद्मावती किमवदत् ?

(झ) जयदेवस्य कृते का विषमस्थितिः जाता ?

(ञ) जयदेवरूपेण आगतः श्रीकृष्णः पद्मावतीं किमुक्तवान् ?

(ट) स्वयं श्रीकृष्णः आगत्य पदं लिखितवान् इति कथं ज्ञातम् ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कः जयदेवस्य मित्रम् ?

(ख) जयदेवः कस्य पदं लिखति स्म ?



https://withteachers.in/

(ग) जयदेवस्य पितुः नाम किम् ?

(घ) का जयदेवस्य माता ?

(ङ) का पद्मावती ?

(च) सरसवसन्ते कः विहरति ?

(छ) पद्मावती पराशरस्य कृते कस्य प्रसादम् आनयति ?

(ज) कः चिन्तायुक्तः आसीत् ?

(झ) कुञ्जवने नागरराजं का प्रतीक्षते ?

(ञ) कं शरणं ग्रहीतुं पद्मा पतिम् उपदिशति ?

(ट) जयदेवः स्नानाय कुत्र याति ?

(ठ) स लेखनीं तालपत्रं च कुत्र स्थापयति ?

(ड) कः जयदेवरूपेण आगत्य पदं लिखति ?

(ढ) परमकारुणिकोऽसौ भक्तस्य किं जानाति ?

(ण) का श्रीकृष्णस्य साक्षाद् दर्शनं प्राप्तवती ?

3. **बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं लिखत ।**

(क) लेखनीहस्तः <u>जयदेवः</u> गीतगोविन्दपद्यं लिखति ।

(कर्त्तरि प्रथमा, अव्यययोगे प्रथमा, उक्ते कर्मणि प्रथमा)

(ख) जयदेवः <u>गीतगोविन्दं</u> रचितवान् ।

(कर्मणि द्वितीया, व्याप्त्यर्थे द्वितीया, क्रियाविशेषणे द्वितीया)

(ग) <u>जयदेवस्य</u> जननी रामादेवी ।

(सम्बन्धे षष्ठी, कृद्योगे षष्ठी, अनादरे षष्ठी)

(घ) वसन्तवर्णनं <u>वसन्तरागेण</u> कृतम् ।

(करणे तृतीया, प्रकृत्यादिभ्यः तृतीया, प्रयोजनार्थे तृतीया)



https://withteachers.in/

(ङ) पद्मावती श्रीजगन्नाथस्य <u>प्रसादम्</u> आनीतवती ।

(कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया, वीप्सार्थे द्वितीया)

(च) कान्तः <u>चिन्तायुक्तः</u> आलोक्यते ।

(अव्यययोगे प्रथमा, कर्त्तरि प्रथमा, उक्ते कर्मणि प्रथमा)

(छ) तैलमानय, स्नानाय <u>सागरं</u> यामि ।

(क्रियाविशेषणे द्वितीया, अत्यन्तसंयोगे द्वितीया, कर्मणि द्वितीया)

(ज) गृहस्य चाले <u>तालपत्रं</u> लेखनीं च स्थापयति ।

(कर्मणि द्वितीया, कालवाचकशब्दयोगे द्वितीया, क्रियाविशेषणे द्वितीया)

(झ) पद्यं <u>पत्रे</u> लिखित्वा इदानीम् एव गतः ।

(स्थानाधिकरणे सप्तमी, भावे सप्तमी, अवच्छेदे सप्तमी)

(ञ) परमकारुणिकोऽसौ <u>भक्तस्य</u> भावं जानाति ।

(कृद्योगे षष्ठी, सम्बन्धे षष्ठी, स्मरणार्थे षष्ठी)

(ट) <u>श्रीकृष्णस्य</u> चरणतले प्रणत्यर्घ्यं निवेदयिष्यामः ।

(सम्बन्धे षष्ठी, कृत्यप्रत्यययोगे षष्ठी, अनादरे षष्ठी)

**4. अधोलिखितानि पदानि व्यवहृत्य वाक्यानि रचयत ।**

उपविश, तुलना, समम्, पुरतः, नमस्करोति, अध्यास्ते, विना, बहिः, समाप्य, प्राक् ।

**5. सन्धिं कुरुत ।**

(क) जयदेवम् + आलिङ्ग्य, जगत् + नाथ !, धन्यः + त्वम् , सुहृत् + वर, हरिः + इह, अत्र + आगच्छ, नमः + करोमि, अहम् + अपि, पराशरः + च, गायक + उत्तमः, पुनः + दर्शनाय।

**6. सन्धिविच्छेदं कुरुत ।**

साक्षाद्दर्शनम्, कथामद्य, किमस्य, काऽपि, किञ्चिदपि, यथेष्टम् , एवास्य, त्वमेव, तदेव, बहिर्गच्छति ।



https://withteachers.in/

**7. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) त्वत्सदृशः (त्वया सदृशः, तव सदृशः, त्वयि सदृशः) ।

(ख) इष्टम् अनतिक्रम्य (यथेष्टः, यथेष्टम्, यथेष्टेन) ।

(ग) चिन्तायाः कारणम् (बहुव्रीहिः, द्वन्द्वः, षष्ठीतत्पुरुषः) ।

(घ) विरहविधुरा (विरहस्य विधुरा, विरहे विधुरा, विरहेण विधुरा) ।

(ङ) विषमा स्थितिःतस्याम् (विषमस्थित्या, विषमस्थितौ, विषमस्थितेः) ।

(च) चिन्तामुक्तः (कर्मधारयः, द्विगुः, पञ्चमीतत्पुरुषः) ।

(छ) कान्तकोमलम् (कान्तं कोमलम्, कान्तेन कोमलम्, कान्तश्चासौ कोमलश्च)

(ज) वर्णनाय इदम् (वर्णनार्थः, वर्णनार्था, वर्णनार्थम्) ।

(झ) लेखनीहस्तः (कर्मधारयः, बहुव्रीहिः, अव्ययीभावः) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) उपविष्टः = उप + विश् + ——— (अन, ल्यप्, क्त) ।

(ख) लिखन् = लिख् + ——— (घञ्, शतृ, ल्युट्) ।

(ग) भक्तिः = भज् + ——— (क्तः, शानच्, क्तिन्) ।

(घ) गातुम् = गै + ——— (तुमुन्, ल्युट्, शतृ) ।

(ङ) प्रसादः = प्र + ——— + घञ् (सद्, सृ, सृज्) ।

(च) दर्शनम् = ——— + ल्युट् (दृश्, दा, दीप्) ।

(छ) कृतः = कृ + ——— (क्त, क्तवतु, क्त्वा) ।

**9. स्त्रीप्रत्यये रूपाणि लिखत –**

रसिक, भक्त, गायक, बन्धु, विरहिन्, धन्य, विलासिन्, अपर ।

■



https://withteachers.in/

## पद्यभागः

# सीतायाः वनगमनम्

*विषयोऽयम् आदिकवेः वाल्मीकेः रामायणात् स्वीकृतः । रामायणस्य कथा नितरां रम्या, ततः सुष्ठु कथ्यते ''रम्या रामायणी कथा'' । अपि च मनुष्याणाम् आचार-विचारविषये ''रामायणम्'' आदर्शस्थानीयम्, रामस्तु मर्य्यादावान् आदर्शपुरुषः ।*

*कैकेय्या सत्यपाशेन बद्धः दशरथः रामं वनाय प्रेषितवान् । सीताऽपि पत्या (रामेण) सह वनं गन्तुम् ऐच्छत् गतवती च ।*

प्रविवेशाथ रामस्तु स्ववेश्म सुविभूषितम् ।
प्रहृष्टजनसम्पूर्णं ह्रिया किञ्चिदवाङ्मुखः । १ ।
अथ सीता समुत्पत्य वेपमाना च तं पतिम् ।
अपश्यच्छोकसंतप्तं चिन्ताव्याकुलितेन्द्रियम् । २ ।
तां दृष्ट्वा स हि धर्मात्मा न शशाक मनोगतम् ।
तं शोकं राघवः सोढुं ततो विवृततां गतः । ३ ।
विवर्णवदनं दृष्ट्वा तं प्रस्विन्नममर्षणम् ।
आह दुःखाभिसंतप्ता किमिदानीमिदं प्रभो । ४ ।
अभिषेको यदा सज्जः किमिदानीमिदं तव ।
अपूर्वो मुखवर्णश्च न प्रहर्षश्च लक्ष्यते । ५ ।
इतीव विलपन्तीं तां प्रोवाच रघुनन्दनः ।
सीते तत्रभवांस्तातः प्रव्राजयति मां वनम् । ६ ।
कुले महति संभूते धर्मज्ञे धर्मचारिणि ।
शृणु जानकि येनेदं क्रमेणाद्यागतं मम । ७ ।
राज्ञा सत्यप्रतिज्ञेन पित्रा दशरथेन वै ।
कैकेय्यै मम मात्रे तु पुरा दत्तौ महावरौ । ८ ।
तयाद्य मम सज्जेऽस्मिन्नभिषेके नृपोद्यते ।
प्रचोदितः स समयो धर्मेण प्रतिनिर्जितः । ९ ।
चतुर्द्दश हि वर्षाणि वस्तव्यं दण्डके मया ।
पित्रा मे भरतश्चापि यौवराज्ये नियोजितः । १० ।
विप्रियं न च कर्त्तव्यं भरतस्य कदाचन ।
स हि राजा च वैदेहि देशस्य च कुलस्य च । ११ ।
अहं गमिष्यामि महावनं प्रिये
त्वया हि वस्तव्यमिहैव भामिनि ।
यथा व्यलीकं कुरुषे न कस्यचित्
तथा त्वया कार्य्यमिदं वचो मम । १२ ।
एवमुक्ता तु वैदेही प्रियार्हा प्रियवादिनी ।
प्रणयादेव संक्रुद्धा भर्त्तारमिदमब्रवीत् । १३ ।
किमिदं भाषसे राम वाक्यं लघुतया ध्रुवम् ।



https://withteachers.in/

त्वया यदपहास्यं मे श्रुत्वा नरवरोत्तम । १४ ।
आर्य्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा ।
स्वानि पुण्यानि भुञ्जाना: स्वं स्वं भाग्यमुपासते । १५ ।
भर्त्तुर्भाग्यं तु नार्य्येका प्राप्नोति पुरुषर्षभ ।
अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि । १६ ।
प्रासादाग्रे विमानैर्वा वैहायसगतेन वा ।
सर्वावस्थागता भर्त्तु: पादच्छाया विशिष्यते । १७ ।
अहं दुर्गं गमिष्यामि वनं पुरुषवर्जितम् ।
नानामृगगणाकीर्णं शार्द्दूलगणसेवितम् । १८ ।
सुखं वने निवत्स्यामि यथैव भवने पितु: ।
अचिन्तयन्ती त्रींल्लोकांश्चिन्तयन्ती पतिव्रतम् । १९ ।
स एवं ब्रुवतीं सीतां धर्मज्ञां धर्मवत्सल: ।
न नेतुं कुरुते बुद्धिं वने दु:खानि चिन्तयन् । २० ।
सीते यथा त्वां वक्ष्यामि तथा कार्य्यं त्वयाबले ।
वने दोषा हि बहवो वसतस्तान् निबोध मे । २१ ।
सुप्यते पर्णशय्यासु स्वयंभग्नासु भूतले ।
रात्रिषु श्रमखिन्नेन तस्मात् दु:खमतो वनम् । २२ ।
उपवासश्च कर्त्तव्यो यथाप्राणेन मैथिलि ।
जटाभारश्च कर्त्तव्यो वल्कलाम्बरधारणम् । २३ ।
अतीव वातस्तिमिरं बुभुक्षा चाति नित्यश: ।
भयानि च महान्त्यत्र ततो दु:खतरं वनम् । २४ ।
तदलं ते वनं गत्वा क्षेमं न हि वनं तव ।
विमृशन्निव पश्यामि बहुदोषकरं वनम् । २५ ।
एतत् तु वचनं श्रुत्वा सीता रामस्य दु:खिता ।
प्रसक्ताश्रुमुखी मन्दमिदं वचनमब्रवीत् । २६ ।
ये त्वया कीर्त्तिता दोषा वने वस्तव्यतां प्रति ।
गुणानित्येव तान् विद्धि तव स्नेहपुरस्कृता । २७ ।
त्वया च सह गन्तव्यं मया गुरुजनाज्ञया ।
त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम् । २८ ।
भक्तां पतिव्रतां दीनां मां समां सुखदु:खयो: ।
नेतुमर्हसि काकुत्स्थ समानसुखदु:खिनीम् । २९ ।
यदि मां दु:खितामेवं वनं नेतुं न चेच्छसि ।
विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् । ३० ।
तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दु:खिताम् ।
उवाच वचनं राम: परिविश्वासयंस्तदा । ३१ ।
आरभस्व शुभश्रोणि वनवासक्षमा: क्रिया: ।
नेदानीं त्वदृते सीते स्वर्गोऽपि मम रोचते । ३२ ।

**(रामायणस्यायोध्याकाण्डम् )**

## अन्वया :

1. अथ राम: ह्रिया किञ्चिदवाङ्मुख: (सन्) तु प्रहृष्टजनसम्पूर्णं सुविभूषितं स्ववेश्म प्रविवेश।
2. अथ सीता वेपमाना (सती) समुत्पत्य शोकसन्तप्तं चिन्ताव्याकुलितेन्द्रियं तं पतिम् अपश्यत् ।
3. स धर्मात्मा राघव: हि तां दृष्ट्वा मनोगतं तं शोकं सोढुं न शशाक । तत: विवृततां गत: ।



https://withteachers.in/

4. विवर्णवदनं प्रस्विन्नम् अमर्षणं तं दृष्ट्वा दु:खाभिसन्तप्ता सीता आह– प्रभो ! इदानीम् इदं किम् ?

5. यदा अभिषेक: सज्ज:, इदानीं तव इदं किम् ? मुखवर्ण: च अपूर्व:, प्रहर्ष: च न लक्ष्यते ।

6. इतीव विलपन्तीं तां रघुनन्दन: प्रोवाच – सीते ! तत्रभवान् तात: मां वनं प्रव्राजयति ।

7. हे महति कुले संभूते ! धर्मज्ञे ! धर्मचारिणि ! जानकि ! अद्य येन क्रमेण मम इदम् आगतं (तत्) शृणु।

8. पुरा सत्यप्रतिज्ञेन पित्रा राज्ञा दशरथेन तु मम मात्रे कैकेय्यै महावरौ दत्तौ ।

9. अद्य नृपोद्यते मम अस्मिन् अभिषेके सज्जे तया (कैकेय्या) धर्मेण प्रतिनिर्जित: स: समय: प्रचोदित:।

10. मया हि दण्डके चतुर्दश वर्षाणि वस्तव्यम् । भरत: अपि मे पित्रा यौवराज्ये नियोजित: च ।

11. वैदेहि ! कदाचन भरतस्य विप्रियं न कर्त्तव्यम् । स: हि देशस्य कुलस्य च राजा ।

12. प्रिये ! अहं महावनं गमिष्यामि । भामिनि ! त्वया हि इह एव वस्तव्यम् । यथा कस्यचित् व्यलीकं न कुरुषे, तथा त्वया कार्य्यम् , इदं मम वच: ।

13. एवम् उक्ता प्रियार्हा प्रियवादिनी वैदेही प्रणयात् एव संक्रुद्धा (सती) भर्त्तारम् इदम् अब्रवीत् ।

14. हे राम ! लघुतया इदं किं भाषसे ? हे नरवरोत्तम ! त्वया यत् (उक्तं) श्रुत्वा मे धृवम् अपहास्यं (जायते) ।

15. आर्यपुत्र ! पिता, माता, भ्राता, पुत्र: तथा स्नुषा स्वानि पुण्यानि भुञ्जाना: स्वं स्वं भाग्यम् उपासते ।

16. हे पुरुषर्षभ ! नारी एका तु भर्त्तु: भाग्यं प्राप्तोति । अत: ''वने वस्तव्यम्'' इति अपि अहम् आदिष्टा च ।

17. प्रासादाग्रे विमानै: वा वैहायसगतेन वा सर्वावस्थागता भर्त्तु: पादच्छाया विशिष्यते ।

18. अहं पुरुषवर्जितं नानामृगगणाकीर्ण्णं शार्दूलगणसेवितं दुर्गं वनं गमिष्यामि ।

19. त्रीन् लोकान् अचिन्तयन्ती, पतिव्रतं चिन्तयन्ती (अहं सीता) यथा एव पितु:भवने (तथा एव) वने सुखं निवत्स्यामि ।

20. धर्मवत्सल: स: वने दु:खानि चिन्तयन् एवं ब्रुवतीं धर्मज्ञां सीतां (वनं) नेतुं बुद्धिं न कुरुते ।

21. हे सीते ! त्वां यथा वक्ष्यामि त्वया तथा कार्य्यम् । हे अबले ! वने वसत: मे बहव: दोषा: (सन्ति) । तान् निबोध ।



https://withteachers.in/

22. श्रमखिन्नेन रात्रिषु भूतले स्वयंभग्नासु पर्णशय्यासु सुप्यते । अत: तस्मात् वनं दु:खम् ।

23. हे मैथिलि ! यथाप्राणेन उपवास: कर्त्तव्य:, जटाभार: च कर्त्तव्य:, बल्कलाम्बरधारणं च (कर्त्तव्यम्) ।

24. अत्र (वनवासे) नित्यश: अतीव वात: तिमिरं वुभुक्षा महान्ति भयानि च (सन्ति) । तत: वनं दु:खतरम् ।

25. तत् ते वनं गत्वा अलम् । वनं गत्वा तव क्षेमं न हि (भवेत्)। विमृशन् इव पश्यामि, वनं बहुदोषकरं (भवति) ।

26. रामस्य तु एतत् वचनं श्रुत्वा सीता दु:खिता, प्रसक्ता अश्रुमुखी (सती) मन्दम् इदं वचनम् अब्रवीत् ।

27. वने वस्तव्यतां प्रति ये दोषा: त्वया कीर्त्तिता:, तान् गुणान् इति एव विद्धि । (यत: अहं सीता) तव स्नेहपुरस्कृता ।

28. गुरुजनाज्ञया मया च त्वया सह गन्तव्यम् । राम ! त्वद्वियोगेन इह मे जीवितं त्यक्तव्यम् ।

29. (हे) काकुत्स्थ ! भक्तां पतिव्रतां सुखदु:खयो: समां समानसुखदु:खिनीं मां दीनां (वनं) नेतुं त्वम् अर्हसि ।

30. यदि एवं दु:खितां मां च वनं नेतुं न इच्छसि (तर्हि) मृत्युकारणात् अहं विषम् अग्निं जलं वा आस्थास्ये ।

31. तदा राम: विसंज्ञाम् इव दु:खितां तां बाहुभ्यां परिष्वज्य तदा परिविश्वासयन् वचनम् उवाच ।

32. हे शुभश्रोणि ! इदानीं वनवासक्षमा: क्रिया: आरभस्व । हे सीते ! त्वत् ऋते स्वर्ग:अपि मम न रोचते ।

## टिप्पणी :

**प्रविवेश** – ପ୍ରବେଶକଲେ, **स्ववेश्म** – ନିଜକକ୍ଷକୁ, **ह्रिया** – ଲାଜରେ, **अवाङ्मुख:** – ଅଧୋମୁଖ/ ଅଧୋବଦନ/ତଳମୁଖ ହୋଇଥିବା, **समुत्पत्य** – ଉଠି, **वेपमाना** – ଥରିଥରି **शोकसंतप्तम्** – ଶୋକସନ୍ତାପିତ, **चिन्ताव्याकुलितेन्द्रियम्** – ଚିନ୍ତା ହେତୁ ବିଚଳିତ/ବିକଳିତ ଇନ୍ଦ୍ରିୟ ହୋଇଥିବା, **शशाक** – ସମର୍ଥ ହେଲେ, **मनोगतम्** – ମନରେଥିବା, **सोढुम्** – ସହିବାକୁ, **प्रस्विन्नममर्षणम्** = (**प्रस्विन्नम्** + **अमर्षणम्**) – ସ୍ୱେଦଯୁକ୍ତ ଓ ଅସହନୀୟ, **सज्ज:** – ପ୍ରସ୍ତୁତ, **विलपन्तीम्** – କାନ୍ଦୁଥିବା,



https://withteachers.in/

**रघुनन्दन:** – ରାମ, **प्रव्राजयति** – ପଠାଉଛନ୍ତି, **धर्मज्ञे** – ଧର୍ମଜାଣିଥିବା, **जानकि** – (ସମ୍ବୋଧନରେ ହ୍ରସ୍ୱ ଇ କାର) ଜନକପୁତ୍ରୀ (ସୀତା), **सत्यप्रतिज्ञेन** – ସତ୍ୟନିଷ୍ଠ (ରାଜାଙ୍କ) ଦ୍ୱାରା, **यौवराज्ये** – ଯୁବରାଜ ପଦରେ **प्रचोदित:** – ଉପସ୍ଥାପିତ, ପ୍ରେରଣାପ୍ରାପ୍ତ, **दण्डके** – ଦଣ୍ଡକାରଣ୍ୟରେ, **विप्रियम्** – ଅପ୍ରିୟ, **वैदेहि** – ବିଦେହ (ରାଜ୍ୟ) ନନ୍ଦିନୀ, **व्यलीकम्** – ଅପ୍ରିୟ, **प्रणयादेव (प्रणयात् + एव)** – ସ୍ନେହହେତୁ, **ध्रुवम्** – ନିଶ୍ଚିତ, **अपहास्यम्** – ଅପହାସର ଯୋଗ୍ୟ, **स्नुषा** – ବୋହୂ, **पुरुषर्षभ** – ପୁରୁଷଶ୍ରେଷ୍ଠ, **विमानै:** – ରଥରେ (ବ୍ୟୋମଯାନ), **वैहायसगतेन** – ଆକାଶ ମାର୍ଗରେ ଗମନଦ୍ୱାରା **पुरुषवर्जितम्** – ମନୁଷ୍ୟନଥିବା, **नानामृगगणाकीर्णम्** – ବିବିଧପଶୁସଂକୁଳ, **शार्दूलगणसेवितम्** – ହିଂସ୍ର (ସିଂହ, ବ୍ୟାଘ୍ର, ଶାର୍ଦ୍ଦୂଳ) ଜନ୍ତୁ ରହୁଥିବା, **अचिन्तयन्ती** – ଚିନ୍ତାକରୁନଥିବା, **ब्रुवतीम्** – କହୁଥିବା (ସ୍ତ୍ରୀ), **धर्मवत्सल:** – ଧର୍ମପ୍ରିୟ, **निबोध** – ବୁଝିନିଅ, **मैथिलि** – ମିଥିଳା (ରାଜ୍ୟ) ରାଜକୁମାରୀ ସୀତା (ସମ୍ବୋଧନରେ) , **बुभुक्षा** – ଭୋଜନ ଇଚ୍ଛା, ଭୋକ, **नित्यश:** – ସର୍ବଦା, **क्षेमम्** – କଲ୍ୟାଣକର/ ଶୁଭଙ୍କର, **विमृशन्** – ବିଚାରକରିକରି, **प्रसक्ताश्रुमुखी** – ଲୋତକାପ୍ଲୁତବଦନା, **त्वद्वियोगेन** – ତୁମବିଚ୍ଛେଦରେ, **जीवितम्** – ଜୀବନ, **काकुत्स्थ** – କକୁତ୍ସ୍ଥ ବଂଶଜ (ରାମ), **परिष्वज्य** – ଆଲିଙ୍ଗନକରି, **विसंज्ञामिव** – ଚେତନା ହରାଇଲା ପରି, **आरभस्व** – ଆରମ୍ଭକର, **नेदानीम्** = (न + इदानीम्) अधुना (ବର୍ତ୍ତମାନ), **त्वदृते** – ତୁମବିନା

## अभ्यास:

1. **निजभाषया प्रायश: वाक्यत्रयेण उत्तरं लिखत ।**

(क) वेपमाना सीता कीदृशं पतिम् अपश्यत् ?

(ख) कथं राघव: शोकं सोढुं समर्थ: न आसीत् ?

(ग) विलपन्तीं सीतां रघुनन्दन: किं प्रोवाच ?

(घ) कस्य विप्रियं न कर्त्तव्यमिति रामेण उक्तम् ?

(ङ) रामेण सीता कथम् उपदिष्टा ?

(च) कीदृशं वनं गन्तुं सीता समर्था इति अवदत् ?

(छ) कथं दु:खतरं वनम् ?

(ज) सीताया: मृत्युकारणं कथं किं वा भविष्यति ?

(झ) वनगमनाय किं कर्त्तुं राम: सीताम् उपदिष्टवान् ?



https://withteachers.in/

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कथं रामः अवाङ्मुखः अभवत् ?

(ख) कीदृशं रामं दृष्ट्वा सीता दुःखाभिसंतप्ता अभवत् ?

(ग) विवर्णवदनं रामं सीता किम् अपृच्छत् ?

(घ) कः सत्यप्रतिज्ञः आसीत् ?

(ङ) दशरथः कस्यै वरौ दत्तवान् ?

(च) कथं सीता वैदेही इति उच्यते ?

(छ) के स्वं स्वं भाग्यम् उपासते ?

(ज) नारी कस्य भाग्यं प्राप्नोति ?

(झ) वनवासकाले कुत्र सुप्यते ?

(ञ) रामस्य वियोगेन सीता किं करिष्यति इति अवदत् ?

**3. अधोलिखितपदानि व्यवहृत्य वाक्यानि रचयत ।**

ह्रिया, मन्दम्, कर्त्तव्यम्, प्रणयात्, अलम्, सह, इव, ऋते, रोचते ।

**4. सन्धिं कुरुत ।**

मुखवर्णः + च, भवान् + तातः, नृप + उद्यते, किम् + इदम् , पुत्रः + तथा, विमानैः + वा, वसतः + तान् , महान्ति + अत्र, विमृशन् + इव , त्यक्तव्यम् + इह, विषम् + अग्निम् , त्वत् + ऋते ।

**5. सन्धिविच्छेदं कुरुत ।**

प्रविवेशाथ, प्रहर्षश्च, तयाद्य, कार्यमिदं, प्रणयादेव, नार्येका, भाग्यमुपासते, पुरुषर्षभ, यथैव, त्वयाबले, अतीव, चाति, मन्दमिदम्, नेदानीम् ।

6. **बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) प्रहृष्टजनैः संपूर्णम् । (षष्ठीतत्पुरुषः, तृतीयातत्पुरुषः, बहुव्रीहिः) ।



https://withteachers.in/

(ख) शोकसन्तप्तम् । (शोकेन सन्तप्तः तम्, शोके सन्तप्तम्, शोकं सन्तप्तम्) ।

(ग) धर्मात्मा (नित्यसमासः, उपपद् तत्पुरुषः, बहुव्रीहिः) ।

(घ) विवर्णवदनम् (कर्मधारयः, बहुव्रीहिः, तृतीयातत्पुरुषः) ।

(ङ) न पूर्वः (अपूर्वः, नपूर्वः, विपूर्वः) ।

(च) मुखवर्णः (मुखे वर्णः, मुखस्य वर्णः, मुखात् वर्णः) ।

(छ) रघुनन्दनः (रघोः नन्दनः, रघौ नन्दनः, रघुणा नन्दनः) ।

(ज) धर्मज्ञे ! (षष्ठीतत्, कर्मधारयः, बहुव्रीहिः) ।

(झ) धर्मं चरति इति या (धर्मचारिणी, धर्मचारी, धर्मचरा) ।

(ञ) महावरौ (महान् वरः तौ, महान्तौ वरौ, महतः वरौ) ।

(ट) महावनम् (बहुव्रीहिः, तृतीयातत्पुरुषः, कर्मधारयः) ।

(ठ) प्रियं वदति इति या (प्रियवादी, प्रियवदना, प्रियवादिनी) ।

(ड) नरवरोत्तम ! (सप्तमीतत् पुरुषः, षष्ठीतत्, बहुव्रीहिः) ।

(ढ) त्वद्वियोगेन (षष्ठीतत्, पञ्चमीतत्, तृतीयातत्पुरुषः) ।

(ण) विगता संज्ञा यस्याः ताम् (विसंज्ञम्, विसंज्ञाम्, विसंज्ञानाम्) ।

**7. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) सुविभूषितम् = सु + वि + ——— + क्त । (भूष् , भृश् , भृञ्)

(ख) समुत्पत्य = सम् + उत् + पत् + ——— । (क्त, घञ् , ल्यप् )

(ग) शोकम् = ——— + घञ् । (शुठ्, शुध्, शुच् )

(घ) दृष्ट्वा = दृश् + ——— । (क्त्वा, क्त, तव्य)

(ङ) सोढुम् = ——— + तुमुन् । (सृ, वह् , सह् )

(च) प्रस्विन्नम् = प्र + ——— + क्त । (स्विद् , खच् , खड् )



https://withteachers.in/

(छ) अभिषेकः = अभि + ——— + घञ् । (सिच् , शिष् , सिध् )

(ज) विलपन्तीम् = वि + लप् + ——— (ङीप्) । (घञ्, शतृ, क्त)

(झ) दत्तौ = ——— + क्त । (दाप् , दैप् , दा)

(ञ) वस्तव्यम् = वस् + ——— । (शतृ, क्तवतु, तव्य)

(ट) संक्रुद्धा = सम् + क्रुध् + ——— । (क्त, घञ् , शतृ)

(ठ) भुञ्जानाः = ——— + शानच् । (भू , भुज् , भृज्)

(ड) नेतुम् = ——— + तुमुन् । (नी, नृ, नद् )

(ढ) वसतः = वस् + ——— । (क्त, शतृ, क्तवतु)

(ण) उपवासः = उप + वस् + ——— । (अन, घञ् , शतृ)

(त) विमृशन् = वि + ——— + शतृ । (मृश् , मृद् , मृष्)

(थ) दोषाः = ——— + घञ् । (दु, दूङ् , दुष्)

(द) वियोगेन = वि + ——— + घञ् । (यु, युग्, युज्)

(ध) त्यक्तव्यम् = ——— + तव्य । (त्यज् , तेज् , तेप् )

(न) आदिष्टा = आ + दिश् + ——— । (घञ्, क्त, क्तवतु)

(प) श्रुत्वा = ——— + क्त्वा । (स्मृ, श्रु, स्रु)

(फ) परिष्वज्य = परि + ——— + ल्यप् । (स्वज् , शुच् , स्वद् )

■



https://withteachers.in/

# युधिष्ठिरयक्षसंवादः

S7B4NQ

*कश्चित् यक्षः महाराजस्य युधिष्ठिरस्य ज्ञानबुद्धिपरीक्षार्थं कांश्चित् प्रश्नान् पृष्टवान् । युधिष्ठिरः तेषां प्रश्नानां समुचितानि उत्तराणि प्रदत्तवान् । महाभारतग्रन्थे अयं प्रश्नोत्तरमूलकः संवादः लभ्यते।*

यक्ष उवाच

किंस्वित् प्रवसतो मित्रं ? किं स्विन्मित्रं गृहे सतः ?
आतुरस्य च किं मित्रं ? किं स्विन्मित्रं मरिष्यतः ?।१।

युधिष्ठिर उवाच

विद्या प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः ।२।

यक्ष उवाच

मृतः कथं स्यात् पुरुषः ? कथं राष्ट्रं मृतं भवेत् ?
श्राद्धं मृतं कथं वा स्यात् ? कथं यज्ञो मृतो भवेत् ।३।

युधिष्ठिर उवाच

मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम्
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ।४।

यक्ष उवाच

तपः किं लक्षणं प्रोक्तं को दमश्च प्रकीर्त्तितः ?
क्षमा च का परा प्रोक्ता ? का च ह्रीःपरिकीर्त्तिता ? ।५।

युधिष्ठिर उवाच

तपः स्वधर्मवर्त्तित्वं मनसो दमनं दमः ।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्त्तनम् ।६।

यक्ष उवाच

किं ज्ञानं प्रोच्यते राजन् ? कः शमश्च प्रकीर्त्तितः ?
दया च का परा प्रोक्ता ? किं चार्जवमुदाहृतम् ? ।७।

युधिष्ठिर उवाच

ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता ।
दया सर्वसुखैषित्वमार्जवं समचित्तता ।८।

यक्ष उवाच

कः शत्रुर्दुर्जयः पुंसां ? कश्च व्याधिरनन्तकः ?
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः ? ।९।

युधिष्ठिर उवाच

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।१०।

यक्ष उवाच

कः पण्डितः पुमान् ज्ञेयो ?
नास्तिकः कः प्रकीर्त्तितः ?
को मूर्खः ? कश्च कामः स्यात् ?
को मत्सर इति स्मृतः ? ।११।

युधिष्ठिर उवाच

धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते ।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ।१२।

यक्ष उवाच

को मोदते ? किमाश्चर्यं ? कः पन्थाः ? का च वार्त्तिका ?
वद मे चतुरः प्रश्नान् मृता जीवन्तु बान्धवाः ।१३।



https://withteachers.in/

युधिष्ठिर उवाच

पञ्चमेऽहनि षष्ठे वा शाकं पचति यो गृहे ।

अनृणी चाप्रवासी च स वारिचर ! मोदते ।१४।

अहन्यहनि भूतानि गच्छन्तीह यमालयम् ।

शेषा जीवितुमिच्छन्ति किमाश्चर्यमतः परम् ? ।१५।

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना

नैको मुनिर्यस्य मतं प्रमाणम्।

धर्मस्य तत्त्वं निहितं गुहायां

महाजनो येन गतः स पन्थाः।१६।

पृथ्वी विभाण्डं गगनं पिधानं

सूर्याग्निना रात्रिन्दिवेन्धनेन।

मासर्तुदर्वीपरिघट्टनेन

भूतानि कालः पचतीति वार्ता।१७।

**(महाभारतम् , वनपर्व )**

## अन्वयाः

1. प्रवसतः किं स्वित् मित्रम् ? गृहे सतः किंस्वित् मित्रम् ? आतुरस्य च किं मित्रम् ? मरिष्यतः किंस्वित् मित्रम् ?
2. प्रवसतः विद्या मित्रम्, गृहे सतः भार्या मित्रम्, आतुरस्य भिषक् मित्रम्, मरिष्यतः दानं मित्रम् ।
3. कथं पुरुषः मृतः स्यात् ? कथं राष्ट्रं मृतं भवेत् ? कथं वा श्राद्धं मृतं स्यात् ? कथं यज्ञः तु मृतः भवेत्।
4. दरिद्रः पुरुषः मृतः, अराजकं राष्ट्रं मृतम्, अश्रोत्रियं श्राद्धं मृतम्, अदक्षिणः यज्ञः तु मृतः ।
5. तपः किंलक्षणं प्रोक्तम् ? कः च दमः प्रकीर्तितः ? का च परा क्षमा प्रोक्ता ? का च ह्रीः परिकीर्तिता ?
6. स्वधर्मवर्त्तित्वं तपः, मनसः दमनं दमः । द्वन्द्वसहिष्णुत्वं क्षमा, अकार्य-निवर्त्तनं ह्रीः ।
7. राजन् ! ज्ञानं किं प्रोच्यते ? कः च शमः प्रकीर्त्तितः ? का च परा दया प्रोक्ता ? किं च आर्जवम् उदाहृतम् ?
8. तत्त्वार्थसम्बोधः ज्ञानम्, चित्तप्रशान्तता शमः । सर्वसुखैषित्वम् दया, समचित्तता आर्जवम् ।
9. कः पुंसां दुर्जयः शत्रुः ? कः च अनन्तकः व्याधिः ? कीदृशः च साधुः स्मृतः ? कीदृशः असाधुः स्मृतः ?
10. क्रोधः सुदुर्जयः शत्रुः, लोभः अनन्तकः व्याधिः, सर्वभूतहितः साधुः, असाधुः निर्दयः स्मृतः ।
11. कः पुमान् पण्डितः ज्ञेयः ? कः नास्तिकः प्रकीर्त्तितः ? कः मूर्खः ? कः च कामः स्यात् ? कः मत्सरः इति स्मृतः ?
12. धर्मज्ञः पण्डितः ज्ञेयः, नास्तिकः मूर्खः उच्यते । संसारहेतुः च कामः, हृत्तापः मत्सरः स्मृतः ।
13. कः मोदते ? किम् आश्चर्यम् ? कः पन्थाः ? का च वार्त्तिका ? चतुरः प्रश्नान् (पृच्छामि), मे (उत्तरं) वद, (तव) मृताः बान्धवाः जीवन्तु ।



https://withteachers.in/

14. वारिचर! यः अहनि पञ्चमे (अंशे) षष्ठे (अंशे) वा गृहे शाकं पचति, अनृणी अप्रवासी च (भवति); सः मोदते ।

15. इह अहनि अहनि भूतानि यमालयं गच्छन्ति । शेषाः जीवितुम् इच्छन्ति, अतः परम् आश्चर्यं किम् ?

16. तर्कः अप्रतिष्ठः, श्रुतयः विभिन्नाः एकः मुनिः न अस्ति यस्य मतं प्रमाणम् । धर्मस्य तत्त्वं गुहायां निहितम्, महाजनः येन गतः सः पन्थाः (भवति) ।

17. पृथ्वी विभाण्डं, गगनं पिधानं, सूर्याग्निना , रात्रिन्दिवेन्धनेन , मास-ऋतु-दर्वी परिघट्टनेन , कालः भूतानि पचति इति वार्त्ता ।

## टिप्पणी :

**किंस्वित् (अव्ययम्)** – କ'ଣ/କିପରି, **प्रवसतः** – ପ୍ରବାସୀର, ବିଦେଶରେ ରହୁଥିବା ଲୋକର, **आतुरस्य** – ରୁଗ୍‌ଣର, **सतः** – ଥିବା, **भिषक्** – ବୈଦ୍ୟ/ଚିକିତ୍ସକ, **श्राद्धम्** – ପିତୃପୁରୁଷଙ୍କ ଉଦ୍ଦେଶ୍ୟରେ ପିଣ୍ଡଦାନକୁ ଶ୍ରାଦ୍ଧକହନ୍ତି, **यज्ञ** – ଯଜ୍ଞ, **अश्रोत्रियम्** – ଧର୍ମଜ୍ଞାନରେ (ବେଦାଦିରେ) ଅନଭିଜ୍ଞ, **जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते । प्रोक्तम्** – କୁହାଯାଇଛି **प्र + उक्तम्, दमः** – ଦମନ, **प्रकीर्तितः** – ଖ୍ୟାତଅଟେ, **स्वधर्मवर्तित्वम्** – ନିଜଧର୍ମରେ ନିଷ୍ଠାପରତା, **द्वन्द्वः** – କଳହ (ବିବାଦ), **सहिष्णुत्वम्** – ସହନଶୀଳତା, **ह्रीः** – ଲଜ୍ଜା, **प्रोच्यते** – **प्र + उच्यते** କୁହାଯାଏ, **चार्जवमुदाहृतम्** – **च + आर्जवम् + उदाहृतम्** , **परा दया** – ସୁଦୟା, **शमश्चित्तप्रशान्तता** – **शमः + चित्तप्रशान्तता** - ମନର ଶାନ୍ତି, **सुखैषित्वम्** – **सुख + एषित्वम्** ସୁଖକାମନା, **आर्जवम्** – ସରଳତା/ସାରଲ୍ୟ, **व्याधिरनन्तक** – **(व्याधिः + अनन्तकः)** ଅନ୍ତହୀନରୋଗ, ଦୁରାରୋଗ୍ୟ ବ୍ୟାଧି, **सर्वभूतहितः** – ସକଳଜୀବର ହିତକାରୀ, **सर्वेभ्यः भूतेभ्यः हितः, मत्सरः** – ପରଶ୍ରୀକାତରତା, **स्मृतः** – କଥିତ, **कामः** – ଜାଗତିକ ବିଷୟଭୋଗଲାଳସା, **संसारहेतुः – जन्ममरण रूपस्य संसारस्य कारणम्** (ଜନ୍ମମରଣ କ୍ରିୟାବନ୍ଧନ ରୂପ ସଂସାରର କାରଣ), **वार्तिका** – ବାର୍ତ୍ତା/ସନ୍ଦେଶ, **शाकम्** – ବୃକ୍ଷଲତା ବ୍ୟଞ୍ଜନଯୋଗ୍ୟଫଳ ପୁଷ୍ପପତ୍ରକୁ ଶାକାନ୍ନକୁହନ୍ତି ଯାହା ସାତ୍ତ୍ୱିକ ଆହାର ଅଟେ । **अप्रवासी** – ନିଜଦେଶରେ ବାସକରୁଥିବା, ନିଜ ଘରେ ରହୁଥିବା, **अनृणी** – ଯେ ଋଣୀ ନୁହେଁ, **वारिचर** – ଜଳଚର (**वकरूपधारी यक्षः** ), **अहन्यहनि** – ପ୍ରତ୍ୟହ, **तर्कः** – ଅପ୍ରାମାଣିକ ଯୁକ୍ତି, **अप्रतिष्ठः** – ପ୍ରତିଷ୍ଠିତ/ପ୍ରମାଣିତ ନୁହେଁ (**अप्रमाणितः**), **निहितम्** – ରହିଅଛି, **गुहायाम्** – ଶାସ୍ତ୍ରରୂପକ ଗହ୍ୱରରେ, **विभाण्डम्** – ବଡ଼ପାତ୍ର, **पिधानम्** – ଢାଙ୍କୁଣୀ, **इन्धनम्** – ଜାଳେଣି, **दर्वी** – ଘାଣ୍ଟିବାପାଇଁ ବ୍ୟବହୃତ ଚାମଚ, କରଚୁଲୀ, **पचति** – ରାନ୍ଧୁଛି / ପାକକରୁଛି ।



https://withteachers.in/

## अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) कस्मात् कारणात् महाजनो येन गतः स पन्थाः भवति ?

(ख) संसारे किम् आश्चर्यकरम् ?

(ग) युधिष्ठिरस्य मतेन वार्त्ता का ?

(घ) पुरुष-राष्ट्र-श्राद्ध-यज्ञाः कथं मृताः भवन्ति ?

(ङ) किं किं कस्य कस्य मित्रम् ?

(च) संसारे कः मोदते ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कः पण्डितः ज्ञेयः ?

(ख) कः असाधुः स्मृतः ?

(ग) कः शमः प्रकीर्त्तितः ?

(घ) अनन्तकः व्याधिः कः ?

(ङ) नास्तिकः कः प्रकीर्त्तितः ?

(च) तपसः लक्षणं किं प्रोक्तम् ?

(छ) आतुरस्य किं मित्रम् ?

(ज) का ह्रीः परिकीर्त्तिता ?

(झ) का परा दया प्रोक्ता ?

(ञ) कः मूर्खः उच्यते ?

(ट) आर्जवं किम् उदाहृतम् ?

(ठ) कः दमः प्रकीर्त्तितः ?

(ड) का परा क्षमा प्रोक्ता ?

(ढ) कः साधुः स्मृतः ?

(ण) पुंसां कः दुर्जयः शत्रुः ?



https://withteachers.in/

**3. वाक्यरचनां कुरुत ।**

किम्, स्यात्, व्याधिः, प्रश्नान्, पचति, इच्छन्ति ।

**4. सन्धिं कुरुत ।**

रात्रिन्दिव + इन्धनेन, व्याधिः + अनन्तकः, प्र + उक्ता, सुख + एषित्वम् , कः + च, दुः + जयः, न + एकः

**5. सन्धिविच्छेदं कुरुत ।**

अहन्यहनि, नैकः, पचतीति, साधुरसाधुः, मासर्तुः, हृत्तापः, जीवितुमिच्छन्ति

**6. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) असाधुः (न साधुः, नास्ति साधुः यत्र, न एव साधुः यस्मिन्)

(ख) यमस्य आलयःतम् (यमालयेन, यमालयम्, यमालयः)

(ग) धर्मज्ञः (बहुव्रीहिः, षष्ठीतत्पुरुषः, कर्मधारयः)

(घ) हृत्तापः (हृदः तापः, हृदि तापः, हृदा तापः)

(ङ) महान् चासौ जनश्चेति (महाजनेन, महाजनः, महाजनम्)

(च) अनृणी (कर्मधारयः, नञ्तत्पुरुषः, द्विगुः)

**7. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) दमनम् = दम् + ________ ( अनीय, ल्युट् , शतृ)

(ख) उदाहृतम् = उद् + आ + ________ + क्त । (हु, हृ, हि)

(ग) पिधानम् = अपि + धा + ________ । (शतृ, ल्युट्, अनीय)

(घ) प्रवसतः = प्र + ________ + शतृ । (वश्, वस्, वष्)

(ङ) सम्बोधः = सम् + बुध् + ________ । (क्त, क्तिन्, घञ्)

(च) जीवितुम् = जीव् + ________ । (तुमुन्, शतृ, क्त)

(छ) प्रमाणम् = प्र + मा + ________ । (ल्युट्, शतृ, क्तवतु)

■



https://withteachers.in/

# मोहमुद्गर:

S7JZQD

*कवितेयं जगद्गुरुशङ्कराचार्यविरचितात् मोहमुद्गरशीर्षकात् संगृहीता, सती शिवगुरुः चेति अनयोः सुतः आचार्यः शङ्करः केरलराज्यस्य कालाडिग्रामे अजायत । आचार्यः शङ्करः मोहमुद्गरमाध्यमेन मानवोद्धारस्य सरलम् उपायं वर्णितवान् । संप्रति चपलमतयः विद्यार्थिनः भौतिकसुखलाभाय सततं यतन्ते । अतः तेषाम् आध्यात्मिकज्ञानविकाशाय मोहविनाशाय च पद्यभागोऽयम् उपकारकः नूनं भविष्यति इति धियात्र प्रस्तुतः ।*

मूढ़ जहीहि धनागमतृष्णां, कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं, वित्तं तेन विनोदय चित्तम् ।१।

नलिनीदलगतजलमतितरलं, तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं, लोकं शोकहतं च समस्तम् ।२।

का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय यदिदं भ्रातः ।३।

मा कुरु धनजनयौवनगर्वं, हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ।४।

दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ।५।

अङ्गं गलितं पलितं मुण्डं, दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ।६।

पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे, कृपयापारे पाहि मुरारे ।७।

अर्थमनर्थं भावय नित्यं, नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ।८।



https://withteachers.in/

कुरुते गङ्गासागरगमनं, व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन, मुक्तिं न भजति जन्मशतेन ।९।

कामं क्रोधं लोभं मोहं, त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढ़ास्ते पच्यन्ते नरकनिगूढ़ाः ।१०।

**(जगद्गुरुः आचार्यः शङ्करः)**

## अन्वया:

1. हे मूढ़ ! मनसि वितृष्णां धनागमतृष्णां जहीहि । सद्बुद्धिं कुरु । निजकर्मोपात्तं वित्तं यल्लभसे तेन चित्तं विनोदय ।
2. नलिनीदलगतजलं (यथा) अतितरलं तद्वत् जीवितम् अतिशयचपलं (भवति) (त्वम्) व्याध्यभिमानग्रस्तं शोकहतं समस्तं लोकं च विद्धि ।
3. ते (तव) का कान्ता, ते कः पुत्रः, अयं संसारः अतीव विचित्रः । हे भ्रातः ! यदिदं त्वं कस्य कः, त्वं कुतः आयातः, तत् चिन्तय ।
4. धनजनयौवनगर्वं मा कुरु, कालः सर्वं निमेषात् हरति । त्वम् इदम् अखिलं मायामयं विदित्वा हित्वा ब्रह्मपदं प्रविश ।
5. दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः कालः क्रीडति आयुर्गच्छति, तदपि आशावायुः (जीवः) न मुञ्चति ।
6. अङ्गं गलितं (भवति) मुण्डं पलितं (भवति) तुण्डं दशनविहीनं जातम् (भवति) वृद्धो दण्डं गृहीत्वा याति, तदपि (सः) आशापिण्डं न मुञ्चति ।
7. (जीवानां) पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनं (भवति) (हे) मुरारे ! कृपया अपारे बहुदुस्तारे इहससांरे (नः) पाहि ।
8. (त्वम्) अर्थम् अनर्थं नित्यं भावय, ततः सुखलेशः नास्ति (एतत्) सत्यम्, धनभाजां पुत्रात् अपि भीतिः (भवति) सर्वत्र एषा रीतिः विहिता ।
9. गङ्गासागरगमनं व्रतपरिपालनम् अथवा दानं कुरुते तथापि ज्ञानविहीनः जन्मशतेन सर्वमतेन मुक्तिं न भजति ।
10. कामं-क्रोधं लोभं मोहं त्यक्त्वा आत्मानं कोऽहम् (इति) भावय, (ये) नरकनिगूढाः आत्मज्ञानविमूढाः ते पच्यन्ते ।



https://withteachers.in/

## टिप्पणी :

जहीहि – ତ୍ୟାଗ କର । विद्धि - ଜାଣ । कान्ता - ପତ୍ନୀ । दिनयामिन्यौ - ଦିନରାତି । पलितम्-पल् + क्त (ପକ୍ୱକେଶ) । तुण्डम् - ମୁଖ। जननम् - ଜନ୍ମ । जननीजठरे - ମାତୃଗର୍ଭରେ। भावय-ଚିନ୍ତାକର । विहिता - ସଂପନ୍ନ । मूढाः - ମୂର୍ଖମାନେ विनोदय - ଖୁସୀ କରାଅ, ଆନନ୍ଦ ଉପଲବ୍ଧି କର ।

## अभ्यासः

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) किं हित्वा केन चित्तविनोदनं करणीयम् ?

(ख) कथं समस्तलोकं शोकहतं विद्धि ?

(ग) शङ्करमतेन कुत्र कथं प्रवेष्टव्यम् ?

(घ) कालस्य क्रीडया किं भवति ?

(ङ) कीदृशः वृद्धः आशापिण्डं न मुञ्चति ?

(च) जन्ममरणविषये शङ्करस्य मतं किम् ?

(छ) सर्वत्र का रीतिः विहिता ?

(ज) के कुत्र कथं पच्यन्ते ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) जीवितं कीदृशं भवति ?

(ख) कोऽयम् अतीव विचित्रः ?

(ग) कः सर्वं हरति ?

(घ) वृद्धः कथं याति ?

(ङ) कुत्र सुखलेशः नास्ति ?

(च) कः मुक्तिं न भजति ?

(छ) समस्तं लोकं कीदृशं विद्धि ?

(ज) वृद्धस्य मुण्डं कीदृशं भवति ?

(झ) कः क्रीडति ?



https://withteachers.in/

**3. वाक्यरचनां कुरुत ।**

कुरु, मनसि, भ्रातः, कस्य, हरति, सर्वत्र ।

**4. सन्धिं कुरुत ।**

अति + इव, संसारः + अयम्, गच्छति + आयुः, वृद्धः + याति, पुनः + अपि, तत् + अपि ।

**5. सन्धिविच्छेदं कुरुत ।**

यल्लभसे, पुनरायातः, कस्ते, मुञ्चत्याशावायुः नास्ति, सर्वत्रैषा, पुत्रादपि, कोऽहम् ।

**6. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) शोकहतम् (शोकेन हतः तम्, शोकात् हतम्, शोकाय हतम्) ।

(ख) जनन्याः जठरं तस्मिन् (जननीजठरः, जननीजठरे, जननीजठरेण) ।

(ग) दशनविहीनम् (पञ्चमीतत्पुरुषः, तृतीयातत्पुरुषः, कर्मधारयः) ।

(घ) शिशिरः च वसन्तः च (शिशिरवसन्तः, शिशिरवसन्तौ, शिशिरवसन्तम्) ।

(ङ) आशापिण्डम् (आशायाः पिण्डः तम्, आशायां पिण्डः तम्, आशया पिण्डः तम्) ।

(च) सर्वेषां मतं तेन (सर्वमतेन, सर्वमतम्, सर्वमतात्) ।

**7. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) बुद्धिम् = बुध् + ——— । (क्त, क्तिन् , शतृ)

(ख) हतम् = ——— + क्त । (हा, हन् , हि )

(ग) हित्वा = ——— + क्त्वा । (हा, हन् , हृ)

(घ) विहिता = वि + ——— + क्त । (हा, हन् , धा)

(ङ) विदित्वा = विद् + ——— । (क्त, क्त्वा, शतृ)

(च) जातम् = ——— + क्त । (जि, या, जन्)

(छ) गृहीत्वा = ——— + क्त्वा । (गृह्, ग्रह्, गृ)

(ज) मरणम् = ——— + ल्युट् । (मृ, मुर्, मृक्ष्)

(झ) जननम् = जन् + ——— । (क्त, शानच्, ल्युट्)

(ञ) भीतिः = भी + ——— । (क्तिन्, क्त, क्त्वा)

(ट) मुक्तिम् = ——— + क्तिन् । (मुड्, मुच्, मुद्)



https://withteachers.in/

# जननी गरीयसी

*सुनामधन्यः डक्टर प्रोफेसर-हरेकृष्ण शतपथिमहोदयः संप्रति तिरुपतिराष्ट्रियसंस्कृत-विद्यापीठस्य (मानितविश्वविद्यालयस्य) कुलपतिः अस्ति । माता निशादेवी-पिता कृष्णचन्द्रः च पुत्रस्य कविप्रतिभया गौरवेण च धन्यौ स्तः ।*

*अयं कविः भारतायनं महाकाव्यं विरच्य २०११ (2011) तमे ख्रीष्टाब्दे केन्द्रसाहित्याकादमीपुरस्कारभाक् अभवत् । जयदयाल डालमिया वाणीन्यासपुरस्कारेण रवीन्द्रनाथटागोरपुरस्कारेण आदिशङ्कराचार्योपाधिना च स विमण्डितः । जननी मे गरीयसी इति पद्यं तस्य महाकाव्यस्यांशविशेषः । विद्यार्थिनां परिवारे सुसंपर्कस्थापनाय मातृमहत्त्वज्ञानलाभाय अत्र कवितेयं सम्पाद्य प्रस्तुता ।*

विदीर्य वक्षः परिगृह्य कर्षणं
सदाभिषिक्ता जलपङ्ककर्दमैः ।
अशेषशस्यं निजसन्ततिं प्रति
तनोति या सा जननी; न मेदिनी ।।१।।

सहस्त्ररश्मिप्रभया प्रतापिता
ह्युदासभावैरपि या प्रभाविता ।
करोति सन्तानकृते हि मङ्गलं
महीतले सा जननी; न मेदिनी ।।२।।

बहूनि पुष्पाणि फलानि तानि च
सुमिष्टमूलानि च पल्लवानि वा ।
यदा निजे वक्षसि सञ्चितानि नो
हिताय सा मे जननी; न मेदिनी ।।३।।

प्रचण्डवर्षाघनभीमगर्जनैः
प्रकम्पवातैस्तडितां च तर्जनैः ।
निरन्तरं जर्जरिताऽपि दुःखिनी
ददाति खाद्यं जननी; न मेदिनी ।।४।।

नवं नवं भावविलासवेष्टितं
मनोरमं मानवताङ्कुरोद्गमम् ।
प्रदर्शयन्ती स्मितहासशोभिनी
विभाति या सा जननी; न मोदिनी ।।५।।

नगाधिराजामृतकुम्भधारिणी
मरुज्जलव्योमधरामहस्विनी ।
महीतले मङ्गलकर्मकारिणी
महीयसी सा जननी; न मेदिनी ।।६।।

परार्थमेकां जनकात्मजां कदा
प्रसूय जाता धरणीह निश्चला ।
परं प्रसूते जनकांस्तु या हि सा
सदा पृथिव्याः जननी गरीयसी ।। ७ ।।

त्वदीयपादाम्बुजपुण्यपीठके
मया यदा श्रीयत एवमम्बिके ।
तदाऽस्मि किं नन्दननन्दकानने
यतः पृथिव्याः जननी गरीयसी ।।८।।

**(प्रफेसर हरेकृष्ण शतपथी, भारतायनम्)**



https://withteachers.in/

## अन्वया :

1. जलपङ्ककर्दमै: सदाभिषिक्ता या कर्षणं परिगृह्य वक्ष: विदीर्य निजसन्ततिं प्रति अशेषं शस्यं तनोति सा जननी, न मेदिनी ।

2. सहस्ररश्मिप्रभया प्रतापिता उदासभावैरपि प्रभाविता या महीतले सन्तानकृते हि मङ्गलं करोति सा जननी, न मेदिनी ।

3. यया बहूनि पुष्पाणि तानि फलानि सुमिष्टमूलानि पल्लवानि वा निजे वक्षसि नो हिताय सञ्चितानि सा मे जननी, न मेदिनी ।

4. प्रचण्डवर्षाघनभीमगर्जनै: प्रकम्पवातै: तडितां च तर्जनै: निरन्तरं जर्जरिता अपि या दु:खिनी खाद्यं ददाति (सा) जननी, न मेदिनी ।

5. नवं नवं भावविलासवेष्टितं मनोरममानवताङ्कुरोद्गमं प्रदर्शयन्ती या स्मितहासिनी विभाति सा जननी, न मेदिनी ।

6. नगाधिराजामृतकुम्भधारिणी मरुत्जलव्योमधरामहस्विनी महीयसी (या) महीतले मङ्गलकर्मकारिणी (भवति) सा जननी, न मेदिनी ।

7. कदा धरणीह परार्थमेकां जनकात्मजां प्रसूय निश्चला जाता परं (या) सदा जनकान् हि प्रसूते सा जननी पृथिव्या: गरीयसी अस्ति ।

8. अम्बिके ! त्वदीयपादाम्बुजपुण्यपीठके मया यदा एवं श्रीयते । तदा किं नन्दननन्दकानने अस्मि (इति अनुभव: भवति) यत: जननी पृथिव्या: गरीयसी ।

## टिप्पणी :

विदीर्य - विदारणंकृत्वा - (ବିଦୀର୍ଣ୍ଣକରି) । तर्जनै: - ଧମକ / ନିନ୍ଦାଦ୍ୱାରା । तर्ज् + ल्युट् (करणे तृतीया) महस्विनी - तेजस्विनी (ଉଜ୍ଜ୍ୱଳ)। परार्थम् + एकाम्, जनकात्मजाम् - सीताम् (ସୀତାଙ୍କୁ) । जनकान् + तु, सन्तानान् (ସନ୍ତାନମାନଙ୍କୁ), एवम् + अम्बिके = एवमम्बिके, नगाधिराजामृतकुम्भधारिणी - (ହିମାଳୟରୁ ପ୍ରବାହିତ ଅମୃତତୁଲ୍ୟ ଗଙ୍ଗାଯମୁନା ସରସ୍ୱତୀ ଇତ୍ୟାଦି ନଦୀଧାରକୁ ଧାରଣ କରିଥିବା । श्रीयते-सेव्यते ।



https://withteachers.in/

# अभ्यासः

1. **निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) जननी सन्ततिं प्रति किं तनोति ?

(ख) कानि संचित्य सा जननी भवितुम् अर्हति ?

(ग) सा जननी कैः जर्जरिता भवति ।

(घ) कया जननी मङ्गलकारिणी भवति ?

(ङ) जननी किं प्रदर्शयन्ती विभाति ?

(च) कुत्र कविः नन्दननन्दकाननसुखम् अनुभवति ?

2. **संक्षेपेण उत्तरं लिखत ।**

(क) जननी केन अभिषिक्ता ?

(ख) का अशेषं शस्यं तनोति ?

(ग) जननी कुत्र सन्तानकृते मङ्गलं करोति ?

(घ) का स्मितहासिनी ?

(ङ) नगाधिराजमृतकुम्भधारिणी इत्यस्य कः अर्थः ?

(च) किं कृत्वा धरणी निश्चला जाता ?

(छ) महस्विनी पदस्य कोऽर्थः ?

3. **वाक्यरचनां कुरुत ।**

जननी, करोति, हिताय, वक्षसि, विभाति, गरीयसी ।

4. **सन्धिं कुरुत ।**

सम् + चितानि, धरणी + इह, जनक + आत्मजाम्, सदा + अभिषिक्ता, एवम् + अम्बिके, तदा + अस्मि



https://withteachers.in/

**5. सन्धिविच्छेदं कुरुत ।**

ह्युदासभावैरपि, निरन्तरम्, मरुज्जलव्योम, जनकांस्तु ।

**6. बन्धनीमध्यात् विग्रहवाक्यं / समस्तपदं / समासनाम चित्वा शुद्धम् उत्तरं लिखत**

(क) उदासभावैः (उदासस्य भावाः तैः, उदासस्य भावः तैः, उदासः भावः तैः) ।

(ख) मह्याः तलं तस्मिन् (महीतलम्, महीतले, महीतलात्) ।

(ग) मनोरमम् (उपपदतत्पुरुषः, कर्मधारयः, द्विगुः) ।

(घ) जनकात्मजाम् (जनकस्य आत्मजा ताम्, जनकस्य आत्मजः तम्, जनकस्य आत्मजा तया) ।

(ङ) परार्थम् (बहुव्रीहिः, द्वन्द्वः, नित्यसमासः) ।

**7. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शुन्यस्थानं पूरयत ।**

(क) विदीर्य = वि + ______ + ल्यप् । (दृ, द्रा, द्रम्)

(ख) परिगृह्य = परि + ग्रह् + ______ । (ण्यत्, यत्, ल्यप्)

(ग) हिताय = ______ + क्त । (हु, हि, हा)

(घ) सञ्चितानि = सम् + चि + ______ । (क्तिन्, तिन्, क्त)

(ङ) प्रसूय = प्र + ______ + ल्यप् । (सृ, सूच्, सू)

(च) कर्षणम् = ______ + ल्युट् । (कुश्, कृष्, कष्)

(छ) तर्जनैः = तर्ज् + ______ । (ल्युट्, अन्, शानच्)

(ज) अभिषिक्ता = अभि + ______ + क्त + टाप् । (षिञ्, सिच्, शिज्)

■



https://withteachers.in/

## अनुच्छेदविभाग:

## (१)

# असाध्यसाधनम्

वोपदेव: नाम कश्चित् शिशु: पठनाय पित्रा गुरुगृहं प्रेषित: । स प्रथमत: व्याकरणं पठितुम् आरब्धवान् । वोपदेव: स्थूलबुद्धि: तथा परिश्रमकातरश्च । पाठे तस्य अमनोयोगम् अवलोक्य सहपाठिन: तम् उपहसन्ति स्म । सहपाठिनाम् उपहासप्रसङ्गं स गुरवे न्यवेदयत् । गुरुस्तम् उक्तवान्-''वत्स ! तव कृते मम महान् यत्न: विफल: जात: । यदि इच्छसि, तर्हि अन्यं विद्यालयं गृहं वा याहि ।'' एतत् श्रुत्वा वोपदेवेन चिन्तितम्-अन्यत्र गमनेन क: लाभ: ? मूर्खे मयि पिता माता वा न स्नेहं करिष्यति । मम जीवनं धिक् । खिन्नमानस: स सरोवरं निकषा गत्वा पावच्छे उपविश्य चिन्तापर: अतिष्ठत् । तदा केचन स्त्रीजना: जलं नेतुमागता:, ते जलपूर्णघटान् पावच्छान्तर्गतेषु गर्त्तेषु अस्थापयन् । अथ वोपदेव: एकं स्त्रीजनमपृच्छत् – ''मात: ! घटस्थापनार्थम् एतानि गर्त्तानि निर्मितानि किम्'' ? ''न हि न हि वत्स ! घटभारादेव क्रमश: गर्त्तानि जातानि'' इति स्त्रीजनेन उक्तम् । एतत् श्रुत्वा वोपदेव: विस्मित: अचिन्तयत् – ''सुकठिन: पाषाण: यदि मृत्तिकापात्रेण क्षुण्ण: तर्हि स्थूलबुद्धिरहं कथं क्रमश: व्याकरणम् आयत्तं न कुर्य्याम् ।''

तदारभ्य स व्याकरणं पठित्वा प्रवीणपण्डितरूपेण प्रतिष्ठाम् अलभत ।

साधूक्तम्- ''उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथै:'' ।

## अभ्यास:

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) गुरु: वोपदेवं किम् उक्तवान् ?

(ख) सहपाठिन: वोपदेवं कथम् उपहसितवन्त: ?

(ग) वोपदेव: विस्मित: किं चिन्तितवान् ?

(घ) स्त्रीजन: वोपदेवं किम् अवदत् ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) पित्रा वोपदेव: कुत्र प्रेषित: ?

(ख) वोपदेव: किं पठितुम् आरब्धवान् ?

(ग) पाषाणे कथं गर्त्तानि जातानि ?

(घ) स्त्रीजनं वोपदेव: किम् सम्बोधितवान् ?

(ङ) वोपदेव: केन रूपेण प्रतिष्ठाम् अलभत ?

■



https://withteachers.in/

# (२)
# सन्निमित्ते वरं त्यागः

पुरा बोधिसत्त्वः ब्राह्मणकुले जातः, सः अत्यन्तमेधावी । अल्पेन कालेन सकलाः विद्याः अधीतवान् । अध्ययनात् परं संसारसुखं त्यक्त्वा स वानप्रस्थम् अकरोत् । एकदा बोधिसत्त्वः वने भ्रमन् पर्वतगुहायां स्थितामेकां व्याघ्रीम् अपश्यत् । सा तत्क्षणमेव शावकान् प्रसूतवती । अतः व्याघ्री खाद्यसंग्रहार्थमसमर्था सती क्षुधया व्याकुला अभवत् । दयालुः बोधिसत्त्वः तस्याः व्याकुलतां ज्ञात्वा चिन्तितवान् – ''हन्त ! जीवस्य दुःखम् । अत्र खाद्यं कः दास्यति ? खाद्यं विना व्याघ्री मरिष्यति एव । मम इदम् अनित्यं शरीरं वृथा भविष्यति । अतः मम शरीरेण व्याघ्र्याः जीवनं रक्षिष्यामि'' इति निश्चित्य स महात्मा व्याघ्रीसमीपं गतः । व्याघ्री अपि तं भुक्त्वा तृप्ता जाता । एवम् भगवान् बुद्धः शतवारं परार्थे प्राणान् त्यक्तवान् ।

साधूक्तम्-धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ।।

## अभ्यासः

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) बोधिसत्त्वः कदा वानप्रस्थम् अकरोत् ?
(ख) वने भ्रमन् बोधिसत्त्वः किम् अपश्यत् ?
(ग) कथं व्याघ्री व्याकुला अभवत् ?
(घ) व्याघ्र्याः असहायतां दृष्ट्वा बोधिसत्त्वः किं चिन्तितवान् ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) व्याघ्री कुत्र आसीत् ?
(ख) महात्मा बोधिसत्त्वः कुत्र गतः ?
(ग) व्याघ्री कथं तृप्ता जाता ?
(घ) बुद्धः कतिवारं प्राणान् त्यक्तवान् ?
(ङ) धनानि जीवितं च किं निमित्तं उत्सृजेत् ?

■



https://withteachers.in/

# (३)

# बुद्धिर्यस्य बलं तस्य

एकस्मिन् सरोवरे कश्चित् कच्छपः प्रतिवसति स्म । मूषिकः काकः मृगश्चैते त्रयः तस्य सखायः आसन् । एकदा स्थलमार्गेण अन्यं जलाशयं प्रति कच्छपः गच्छति स्म । तं कश्चिद् व्याधः बद्ध्वा स्कन्धे संस्थाप्य गृहं गन्तुम् उद्यतः । अथ मूषिकादयः बन्धुं विपद्ग्रस्तं दृष्ट्वा दुःखिताः । ते कच्छपं मोचयितुम् उपायं चिन्तितवन्तः । उपायम् अनुसृत्य मृगः जलाशयस्य समीपे मृतवत् अपतत् । काकश्च तस्योपरि उपविश्य चञ्च्वा विलिखति स्म । अथ भ्रमणकारणात् तृषार्त्तः व्याधः सरोवरात् जलं पीत्वा अदूरे पतितं मृगम् अपश्यत् । अतः स जलाशयस्य समीपे कच्छपं निधाय मृगसमीपं गतः । अस्मिन् अवसरे मूषिकः आगत्य कच्छपस्य बन्धनम् अच्छिनत् । ततः बन्धनमुक्तः कच्छपः जलाशयं प्रविष्टः । मृगकाकौ अपि आगच्छन्तं व्याधं दृष्ट्वा सत्वरं पलायितौ । अथ स व्याधः मृगलोभेन पूर्वगृहीतं कच्छपं न प्राप्तवान् । अतः व्याधः निराशः सन् गृहं प्रस्थितः । सुष्ठु उक्तम् –

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ।।

## अभ्यासः

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) कच्छपस्य के के बान्धवाः आसन् ?

(ख) मूषिकादयः बान्धवाः कथम् उपायं चिन्तितवन्तः ?

(ग) कदा व्याधः मृगम् अपश्यत् ?

(घ) व्याधः कथं विफलः अभवत् ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) कच्छपः स्थलमार्गेण कुत्र अगच्छत् ?

(ख) व्याधः कच्छपं कुत्र संस्थाप्य गृहं गन्तुम् उद्यतः ?

(ग) व्याधः कथं तृषार्त्तः अभवत् ?

(घ) कौ सत्वरं पलायितौ ?

(ङ) व्याधः कीदृशः सन् गृहं प्रस्थितः ?

■



https://withteachers.in/

# (४)
# यशोदेहेन जीवति

भारतस्य स्वाधीनतासंग्रामे ये खलु त्यक्तप्राणाः प्रातःस्मरणीयास्तेषु अन्यतमः वीरः सुरेन्द्रसायः । संबलपुरराज्यस्य चौहानराजवंशे ''खिण्डा'' इति जनपदे 23.01.1809 मिते दिनाङ्के सः अजायत । शैशवे स क्षिप्तेन लोष्ट्रेण तीरेण वा उड्डीयमानान् पक्षिणः वृक्षात् फलानि च अधःपातयति स्म । युवावस्थायां स आत्मानं विचक्षणयोद्धभावेन प्रतिष्ठापितवान् । विदेशिशासकं वहिष्कर्त्तुं तेन प्रजाः संमेल्य विद्रोहः संघटितः । प्रत्यक्षयुद्धे सदा परास्तं प्राप्नुवन् इंरेजशासकः कौशलेन सुरेन्द्रं निगृहीतवान् । 1840 मिते वर्षे नरहत्याऽपराधेन हजारीवाग कारागारे तम् अवस्थापितवान् । अथ देशं सर्वतः 1857 मिते वर्षे आरक्षिणां योगदानेन हजारीवाग-कारागारः ध्वस्तः विध्वस्तश्च, तदा सुरेन्द्रः मुक्तः सन् प्रजाः पुनः संमेल्य द्वितीयवारं विद्रोहमुद्दीपितवान् । परन्तु शासकः तस्य प्रवञ्चनं कृत्वा सुप्तावस्थायां द्वितीयवारं (1864 वर्षे) सुरेन्द्रं निगृहीतवान् । पुनरपराधमारोपयन् आजीवनं कारादण्डमादिश्य सुदूरे ''असुरगड़'' कारागारे अवस्थापितवान् । तत्रैव दीर्घतरं यन्त्रणादायकं वन्दिजीवनम् अतिवाहयन् दृष्टिशक्तिहीनः सः 1884 मिते वर्षे मृतोऽपि अमरः अस्ति । अतः उक्तम् –

''परार्थकर्मणा प्राज्ञो यशोदेहेन जीवति'' ।

## अभ्यासः

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) कस्मिन् वंशे कुत्र च सुरेन्दसायः जातः अभवत् ?

(ख) शैशवे सुरेन्द्रः किम् अकरोत् ?

(ग) हजारीवाग इति कारागारः कथं ध्वस्तः ?

(घ) सुरेन्द्रः कस्याम् अवस्थायां मृतः ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) सुरेन्द्रस्य वंशस्य नाम किम् ?

(ख) सुरेन्द्रः आत्मानं केन भावेन प्रतिष्ठापितवान् ?

(ग) सुरेन्द्रः केन अपराधेन अभियुक्तः ?

(घ) कस्याम् अवस्थायां सुरेन्द्रः द्वितीयवारं निगृहीतः ?

(ङ) कुत्र सुरेन्द्रस्य अन्तिमजीवनं व्यतीतम् ?

■



https://withteachers.in/

# (५)

# हीराकुदबन्धः

ओड़िशा प्रदेशस्य सर्वासु नदीषु महानदी दीर्घतमा । छतिशगड़-राज्यस्य अमरकण्टकपर्वतादेषा प्रभवति । उपकूलभूमिषु अनेकासु धारासु प्रवाहिता एषा अन्ते वङ्गोपसागरे लीयते । वर्षाकाले अस्याः धारासु प्रायः प्रलयङ्करी वन्या आयाति । अनया प्रभूतानि धनानि जीवनानि च क्षीयन्ते । वन्याप्रकोपस्य नियन्त्रणाय सम्बलपुरं निकषा पर्वतद्वयस्य मध्ये महानद्याः बन्ध-निर्माण-प्रकल्पो विहितः आसीत् । अस्य प्रकल्पस्य निर्माणकार्यम् अन्ताराष्ट्रिय- ख्यातिसम्पन्नः यन्त्रिप्रवरो विश्वेश्वरेयामहोदयः सम्पादितवान् । हीराकुदनामके स्थाने अयं बन्धः निर्मितः । ततोऽयं बन्धः ''हीराकुदबन्धः'' इति प्रसिद्धो भवति । स्वाधीनभारतस्य प्रथमप्रधानमन्त्रिणा पण्डितजवाहरलालनेहरुमहोदयेन अस्य बन्धस्य उद्घाटनं कृतम् । तदा प्रभृति जलभाण्डारमिदं बहुलं वन्यायाः नियन्त्रणं करोति । अयं बन्धः विद्युच्छक्तेः उत्पादनाय कृषेः शिल्पस्य च विकाशाय राज्ये गुरुत्वपूर्णां भूमिकां निर्वाहयति । शीततर्ौ विविधकाकलिनिनादिते विशाले जलभाण्डारेऽस्मिन् नौकाविहारः आबालवृद्धवनितानां कृते उपभोग्यो भवति । अतः वक्तुं शक्यते –

''ओडिशाप्रदेशस्य समृद्धौ हीराकुदबन्धस्य भूमिका महत्त्वपूर्णा ।''

## अभ्यासः

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) महानदी केनरूपेण प्रवहन्ती कुत्र लीयते ?

(ख) वन्यया किं भवति ?

(ग) हीराकुद-जलभाण्डारं किं करोति ?

(घ) कदा कुत्र नौकाविहारः उपभोग्यो भवति ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ?**

(क) ओडिशा प्रदेशस्य का दीर्घतमा नदी ?

(ख) अमरकण्टकपर्वतः कुत्रास्ति ?

(ग) महानदी कुत्र लीयते ?

(घ) कः विश्वेश्वरेयामहोदयः ?

(ङ) हीराकुदजलभाण्डारं कदा काकलिनिनादितं भवति ?

■



https://withteachers.in/

## (६)

# परबुद्धिर्भयङ्करी

SH52UE

आसीत् चन्दकारण्ये स्थूलबुद्धिः नाम पशुराज:सिहः । तस्य अमात्येषु तीक्ष्णबुद्धिनामा शृगालः अतीव विश्वस्तः प्रियश्चासीत् । सिंहोऽपि नित्यं मृगान् व्यापाद्य स्वयं भुक्त्वा शृगालं भोजयति । एकदा सिंहः ज्वरेण पीडितो मृगयार्थं नागच्छत् । अतः स तीक्ष्णबुद्धिमवदत् – ''मम कृते किञ्चिद् भोज्यम् आहर'' इति । शृगालः खाद्यस्य अन्वेषणाय इतस्ततो भ्रमन् किमपि नालभत । प्रत्यावर्त्तनकाले स निर्विवेकनामकं गर्दभं दृष्टवान् । कथं गर्दभे विश्वासम् उत्पाद्य सिंहस्य भोज्यार्थमेनं नेष्यामि इति स चिन्तितवान् । ततः सः गर्दभमुपागत्य अवदत् - ''मित्र ! अधुना अस्मत्पशुराजस्य एकः सचिवः आवश्यकः । तदर्थं भवान् एव सर्वथा योग्यः । तर्हि सत्वरं मया साकमागच्छतु भवान्'' इत्युक्त्वा ततः चलितः । निर्विवेकः मूर्खदोषात् शृगाले विश्वस्य सिंहसकाशं गत्वा प्रणम्य अवदत्- ''प्रभो ! भवतः सचिवः भवितुमागतोऽहम्'' । एतच्छ्रुत्वा सिंहः कपटहासं दर्शितवान् । तेन उक्तम्- ''अवश्यं मम सचिवत्वेन त्वां नियोजयिष्यामि, अतः ममान्तिकम् आगच्छ'' । निर्बोधः गर्दभः सानन्दं सिंहसमीपम् आगच्छत् । सिंहोऽपि दन्तैर्नखैश्च गर्दभस्य गलदेशं विभिद्य रक्तं पीत्वा वहिरगच्छत् । तत्रस्थः शृगालः क्षुधया मृतगर्दभस्य शिरः शीघ्रमभक्षयत् । सिंहो वहिरागत्य क्व गतं गर्दभस्य शिरः इति पृष्टवान् । ''बुद्धिः शिरसि विद्यते, गर्दभः निर्बोधः भवति, अतः तस्य शिरः क्व ?'' इति शृगालोऽवदत् । सिंहोऽपि शृगालस्य वचनं सत्यं मन्यमानो मांसं खादित्वा अशेत । अतः सुष्ठु वक्तुं शक्यते–

यस्य नास्ति स्वयं प्रज्ञा परबुद्ध्या भवेच्च किम् ।
निर्विवेकसमो नाशः मूर्खदोषाद् भविष्यति ।।

## अभ्यासः

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) सिंहः नित्यं किं करोति ?

(ख) गर्दभं दृष्ट्वा शृगालः किम् अचिन्तयत् ?

(ग) गर्दभस्य समीपं गत्वा शृगालः किमवदत् ?

(घ) किं कृत्वा सिंहः वहिरगच्छत् ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) सिंहस्य नाम किम् ?

(ख) शृगालस्य नाम किम् ?

(ग) कथं सिंहः मृगयार्थं नागच्छत् ?

(घ) सिंहः कस्य रक्तम् अपिबत् ?

(ङ) क्षुधया शृगालः किम् अभक्षयत् ?

■



https://withteachers.in/

SHDXM2

# (७)

# सर्वंसहा

पुरा ब्रह्मा आकाशं सूर्यं वारिदं पवनं भूदेवीं च समाहूय वरप्रार्थनाय आह । तच्छ्रुत्वा आकाशः अवदत् - ''प्रभो ! मम स्थितिः सर्वोपरि भवतु ।'' ततः सूर्यः आकाशं न्यूनतरं कर्त्तुं तस्य वक्षसि विचरणार्थमभिललाष । वारिदोऽपि ततोऽधिको भवितुं सूर्याच्छादनशक्तिम् अकामयत । पुनश्च वायुः एतत्सर्वं विलोक्य ब्रह्माणमुक्तवान् - ''नाथ ! संप्रति वारिदः सर्वशक्तिमान् संजातः । अतस्तं डययितुं मे तादृशी शक्तिर्भवतः कृपयाऽस्तु । ब्रह्मा एतेषां प्रार्थनां पूरयित्वा अन्ते भूदेवीं पृष्टवान् – ''देवि ! तव या कामनाऽस्ति, निःशङ्कं प्रकाशय ।'' भूदेवी सविनयमुवाच – ''विभो ! मम नास्ति तादृशी काचित् कामना, अतः यथा ते रोचते, भवान् प्रयच्छतु स्वीकरोमि ।'' तदा ब्रह्मा अवदत् – ''देवि ! तवोपरि जीवजगत् सृष्टं मया । एते जीवाः स्वार्थाय विविधैरुपायैः तव शरीरं खिन्नं भिन्नञ्च करिष्यन्ति । किं त्वमेतत्सर्वं सोढुं समर्था भविष्यसि ?'' भूदेवी उक्तवती – ''पितः ! तव प्रसादात् सर्वंसहाऽहम्, सर्वे जीवाः मे सन्तानाः । मातृत्वभावनायाः पुरतः काचित् पीड़ा न तथा बलीयसी । एतच्छ्रुत्वा आकाशः सलज्जं छत्ररूपेण, सूर्यः प्रदीपभावेन च भूदेवीं सेवेते । वारिदः स्वधाराभिः मेदिनीं अभिषिञ्चति । वायुः धरित्र्याः अहर्निशं व्यजनं करोति । एवं सर्वंसहा भूदेवी सहनशक्त्या सर्वान् अतिक्रामति । अतः वक्तुमिदं शक्यते –

सर्वंसहा सुमर्यादा भूदेवी पूजिता सदा ।
अहङ्कारः परित्याज्यः सहनं तु गुणो मतः ।।

## अभ्यासः

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) ब्रह्मा कान् आहूय वरप्रार्थनाय आह ?

(ख) आकाशः किम् अयाचत ?

(ग) वायुः किं प्रार्थितवान् ?

(घ) वारिदस्य का कामना आसीत् ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) आकाशस्य वक्षसि विचरणार्थं कः अभिललाष ?

(ख) सूर्याच्छादनशक्तिं कः अकामयत ?

(ग) वायोः मतेन कः सर्वशक्तिमान् संजातः ?

(घ) ब्रह्मणा कुत्र जीवजगत् सृष्टम् ?

(ङ) छत्ररूपेण कः सेवते ?

■



https://withteachers.in/

# (८)

# किं फलमस्ति दानस्य ?

SHHTXP

कश्चन राजा स्वगुरुं प्रति श्रद्धावान् आसीत् । स एकदा गुरवे पट्टवस्त्राणि दत्तवान् । गुरु: वस्त्राणि गृहीत्वा गृहं प्रति प्रस्थितवान् । मार्गे स एकं दीनं जनं दृष्टवान् । तस्य दुरवस्थाविलोकनेन गुरो: मनसि करुणा जाता । तस्मै राजप्रदत्तानि वस्त्राणि दत्त्वा गुरु: गतवान् । अन्यस्मिन् दिवसे राजा तं जनम् अपश्यत् । गुरवे प्रदत्तं वस्त्रं तस्य शरीरस्य शोभां वर्धयति । गुरु: स्वदत्तं वस्त्रम् अन्यस्मै दत्तवान् इति हेतो: राजा आत्मानम् अपमानितं मानयति स्म । राजा गुरुं किञ्चित् न अपृच्छत् । कालक्रमेण (पुन: दानावसरे) राजा गुरवे सुवर्णकङ्कणं दत्तवान् । तस्मिन् नगरे कश्चिद् दरिद्र: पुरुष: आसीत् । स: कन्याया: विवाहनिमित्तं क्लेशम् अनुभूतवान् । गुरु: तस्मै राजप्रदत्तं सुवर्णकङ्कणम् अददात् । राजा इमं विषयं ज्ञात्वा गुरुम् अपृच्छत् – ''गौरवभावनया भवते उपायनानि प्रदत्तानि । किन्तु भवान् अन्येभ्य: तानि ददाति । किम् एतत् समुचितम् ?'' गुरु: उक्तवान् – ''भवान् उपायनं प्रदाय दानविषयं चिन्तयति । भवान् अद्यापि तद्धनं भवत: इति भावयति । तर्हि कथय -कीदृशं दानं भवता कृतम् ? तद्वस्तुभि: मम प्रयोजनं नासीत् । यत्र प्रयोजनमस्ति तत्र तानि प्रदत्तानि ।'' राजा दानस्य महत्त्वं विज्ञाय गुरुं क्षमां प्रार्थयत । अत एवं वक्तुमुचितम् –

'आशा द्रव्येषु दत्तेषु दु:खं हि जनयिष्यति ।
फलं पात्राय दानस्य सुप्रयोगे विलोक्यते' ।।

## अभ्यास:

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) गुरु: वस्त्राणि कस्मै अददात् ?
(ख) राजा कथम् आत्मानम् अपमानितम् अमन्यत ?
(ग) गुरु: सुवर्णकङ्कणं कस्मै दत्तवान् ?
(घ) गुरो: कङ्कणदानविषये राजा किम् अपृच्छत् ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) क: स्वगुरुं प्रति श्रद्धावान् आसीत् ?
(ख) गुरु: वस्त्राणि गृहीत्वा कुत्र प्रस्थितवान् ?
(ग) जनस्य दु:खस्य अवलोकनेन कस्य मनसि करुणा जाता ?
(घ) क: कन्याया: विवाहनिमित्तं क्लेशम् अनुभूतवान् ?
(ङ) राजा किं विज्ञाय गुरुं क्षमां प्रार्थयत ।

■



https://withteachers.in/

# (९)

# अहिंसाचरणम्

कश्चन ग्रामः । तत्र कश्चन वटवृक्षः आसीत् । तस्मिन् वृक्षे कश्चित् सर्पः वसति स्म । सः अतीव विषधरः आसीत् । वृक्षस्य समीपे मार्गेण आगतान् सर्वान् अपि सः दशति स्म । तस्मात् कारणात् ग्रामजनाः तेन मार्गेण गमनागमनं कर्तुं भयम् अनुभवन्ति स्म । एकदा कश्चन मुनिः तेन एव मार्गेण गच्छन् आसीत् । तं दृष्ट्वा सर्पः 'एषः दशनीयः' इति वेगेन तत्र आगतवान् । परन्तु महात्मनः तपः प्रभावतः सर्पः तं दष्टुं न शक्तः मुनिः अपि तं सर्पम् अहिंसायाः महत्त्वं बोधितवान् । सर्पः मुनेः वचनेन प्रभावितः अभवत् । तदारभ्य सः दंशनं त्यक्तवान् । यद्यपि सर्पः विषधरः तथापि इदानीं सः विषहीनः इव व्यवहरति स्म । अतः जनाः निर्भयं गमनागमनं कुर्वन्ति स्म । दुष्टाः बालाः तस्य उपरि शिलाखण्डं क्षिपन्ति, पीडयन्ति स्म । परन्तु सर्पः शान्ततया तेषां पीड़ां सहते स्म । कानिचन दिनानि अतीतानि । सः मुनिः यदा तत्र आगतवान्, तदा सर्पस्य शरीरं क्षतविक्षतम् आसीत् । सः मुनिम् उक्तवान् - ''स्वामिन् ! भवतः उपदेशकारणतः अहं हिंसाचरणं त्यक्तवान् । परन्तु मम स्थितिः शोचनीया जाता अस्ति'' । तदा मुनिः उक्तवान् – ''भोः मित्र ! अन्यान् मा दशतु परन्तु फुत्कारं मा त्यजतु ।''

सर्पः तथा कृतवान् । फलतः कोऽपि तस्य समीपं नागतः । स हिंसां त्यक्त्वाऽपि शान्त्या वसति स्म । मुनेः उपदेशात् सर्पः नूतनं जीवनदर्शनं प्राप्तवान् । शक्तिमान् भव, परन्तु अपराणामनिष्टं मा कुरु ।

## अभ्यासः

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) कथं जनाः गमनागमने भयम् अनुभवन्ति स्म ?

(ख) कथं सर्पः दंशनं त्यक्तवान् ?

(ग) कथं जनाः निर्भयं गमनागमनं कुर्वन्ति स्म ?

(घ) सर्पस्य स्थितिः कथं शोचनीया जाता ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) सर्पः कीदृशः आसीत् ?

(ख) सर्पः समीपमागतान् सर्वान् किं करोति स्म ?

(ग) सर्पः कीदृशः इव व्यवहरति स्म ?

(घ) मुनिः कस्याः महत्त्वं बोधितवान् ?

(ङ) किं मा त्यजतु इति मुनिः सर्पम् उक्तवान् ?

■



https://withteachers.in/

# (१०)

# अस्माकं राष्ट्रिय: ध्वज:

राष्ट्रिय: ध्वज: राष्ट्रस्य सङ्केत: । अस्माकं राष्ट्रियध्वजे त्रय: रङ्गा: सन्ति । इयं त्रिरङ्गी भारतवर्षस्य परिचयं धारयति । अयं ध्वज: अतीव मनोरम: । अस्य ध्वजस्य ऊद्‌र्ध्वदेशे कुङ्कुम: रङ्ग:, मध्ये धवल: रङ्ग:, अधोदेशे हरित: रङ्ग: च विन्यस्ता: । धवलांशस्य मध्ये अशोकचक्रं वर्तते । अशोकचक्रे अराणां चतुर्विंशति: अस्ति । तत्र कुङ्कुमराग: वीरत्वस्य त्यागस्य च, धवलराग: पवित्रताया: शान्ते: च, हरितराग: उन्नते: समृद्धे: च, अशोकचक्रं सत्यस्य तथा प्रगते: च प्रतीकम् । प्रमुखराष्ट्रियमहोत्सवयो: सर्वे स्वस्थाने राष्ट्रियध्वजम् उड्डयितुं शक्नुवन्ति । स्वाधीनता दिवस:, गणतन्त्रदिवस:, गान्धिजयन्ती च त्रय: प्रधाना: राष्ट्रोत्सवा: । राष्ट्रपतिभवने, उपराष्ट्रपतिभवने, राज्यपालभवनेषु, मन्त्रालयेषु, सर्वोच्चन्यायालये, उच्चन्यायालयेषु, संसद्‌भवने, विधानसभाभवनेषु च प्रतिदिनं राष्ट्रध्वजस्य ससम्मानम् उड्डयनं भवति । एतदेव अवधारणीयं यत् राष्ट्रध्वजस्य उड्डयनकाले कुङ्कुमराग: सदा उपरि एव स्यात् । अयं ध्वज: देशस्य सार्वभौमताया: प्रतीकम् । तस्य अध: दण्डायमाना: भूत्वा राष्ट्रियदिवसेषु राष्ट्रियसंगीतस्य गानं सर्वे कुर्यु: ।

## अभ्यास:

**1. संक्षिप्तम् उत्तरं लिखत ।**

(क) अस्माकं राष्ट्रियध्वजे के रङ्गा: कुत्र विन्यस्ता: ?

(ख) राष्ट्रियध्वजे स्थितानां रङ्गाणां किं महत्त्वम् ?

(ग) के प्रधाना: राष्ट्रोत्सवा: ?

(घ) केषु स्थानेषु प्रतिदिनं राष्ट्रिय: ध्वज: उड्डीयते ?

**2. अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) का तावत् भारतवर्षस्य परिचयं धारयति ?

(ख) अशोकचक्रं कयो: प्रतीकम् ?

(ग) ध्वजस्य उपरि भागे क: राग: वर्त्तते ?

(घ) पवित्रताया: शान्ते: च प्रतीकं किम् ?

(ङ) राष्ट्रियध्वज: कस्य प्रतीकम् ?

■



https://withteachers.in/